
अथमासस्तवकेभाद्रपदमासमाहात्म्यंप्रारभ्यते.


सूत· संवाद· शौनक
नारद· अंबरीष
मंगलागौरी· स्त्री·
शिव· पूजक
ऋषभ· श्वान· संवाद·
रुक्मा· पृथि·
नाग· ब्राह्म·
पार्व· शिव· स्त्री·
समरू· पूजा·
माधवराजा· कौंडिण्य
ललितागौरी· स्त्री·
शिव· स्कंद·
श्रीभगवतार
श्राद्धविधि·

अथभाद्रपदमासमाहात्म्यस्यानुक्रमणिकालिख्यते·

अध्याय·	विषया:
१	शौनकादीनांभाद्रपदमाहात्म्यकथनविषयेप्रश्नः सूतोक्तिप्रारंभः सूतेनकृतः अंबरीषनारदसंवादप्रस्तावः अंबरीषस्यनारदंप्रतिप्रश्नः श्लोकाः२२
२	नारदकृतो भाद्रपदमाहात्म्यकथनप्रारंभः स्नानमाहात्म्यकथनम् तत्रशंखलेतिहासकथनंश्लो·२३
३	भाद्रशुक्लतृतीयायां कर्तव्यंमंगलागौरीव्रतम् तत्रेतिहासकथनम्· श्लोकाः५१
४	तस्यामेव कर्तव्यं हरितालिकाव्रतम्· तत्कथनंसेतिहासम् श्लोका५०
५	अस्यशुक्लचतुर्थ्यां गणपतिव्रतंकथनम्· श्लोकाः ४०
६	रजोदोषनिवृत्तिः केनोपायेनभवेदिति अंबरीषस्यनारदंप्रतिप्रश्नः पृष्टेननारदेनकृतऋषिपंचमीव्रतकथनारंभः तस्यरजस्वलादोषहारकत्वंप्रतिपादयितुंरजोदोषस्वरूपवर्णनं स्कमित्रब्राह्मणेतिहासकथनारंभश्च· श्लोका:३१
७	पूर्वाध्यायप्रचलिताया: कथाया: कथनम् एतद्व्रतसेवनात्स्कमित्रब्राह्मणस्यमातृपितृमुक्तिः श्लोका:३८
८	एतद्व्रतंकदाकार्यमिति अंबरीषेण पृष्टोनारदः व्रताचरणकालादिकं कथयामास· तत्रेतिहास कथनं च श्लोका:३३
९	एतस्यशुक्लपंचम्यांनागव्रतविधिः तत्रेतिहासश्चश्लोकाः ३३
१०	अस्यशुक्लषष्ठ्यांललिताव्रतविधिःएतद्व्रतस्यफलकथनम् श्लोकाः २६
११	अस्यशुक्लसप्तम्यांसोमव्रतंकथयितुंधर्मराजकृष्णसंवादस्यदेवकीलोमशसंवादस्यचप्रस्तावःएतद्व्रताचरणात्पुत्रप्राप्तिर्भवतीतिप्रतिपादयितुंनहुषभार्यायाश्चंद्रमुख्याः कथानकं वक्तुमारंभःश्लोकाः ३१
१२	पूर्वारब्धकथायाःकथनं एतद्व्रताचरणविधिश्चश्लो२५
१३	अस्यशुक्लसप्तम्यांवंध्यानांपुत्रप्रदंज्येष्ठादेवीव्रतकथनं तस्यविधिः श्लो· ३१
१४	अंबरीषेणदूर्वाष्टमीव्रतविषये नारदंप्रतिप्रश्नः पृष्टोनारदः अस्यशुक्लाष्टम्यांकर्तव्यदूर्वाष्टमीव्रतं कथयामास तस्यामेवदूर्वापूजनारच्यस्य व्रतस्य विधिः श्लोकाः ३७
१५	अस्यशुक्लाष्टम्यांकर्तव्यंज्येष्ठाष्टमीव्रतंकथयितुं

अथभाद्रपदमासमाहात्म्यस्यानुक्रमणिकालिख्यते·

अध्याय·	विषयाः
	स्कंदशंकरसंवादप्रस्तावः व्रतस्यास्यविधिः तत्र कोलासुरेतिहासकथनम्· श्लोका:२८
१६	देव्याहृतः कोलासुरवधः यूयंयोगिन्योभवन्तेति चतुःषष्टिराजकन्याभ्योदेव्यादत्तोवरः राजकन्या दिरुतादेवीस्तुतिः श्लो० २८
१७	षोडशदिनसाध्यस्येतस्यमहालक्ष्मीव्रतस्यविस्तरेणविधिकथनं श्लो· २५
१८	एतद्व्रतमाहात्म्यप्रतिपादिकोमंगलार्णराजेतिहासः श्लो· ४५
१९	अस्यशुक्लनवम्यामारभ्यनवम्यारब्धंव्रतंम् तस्यविधिः श्लोका:२६
२०	अनंतरोक्तव्रतविषये अप्सरसः आरब्धानंतस्याएतद्व्रतान्चणान्तिर्यग्योनितउद्धारः श्लो· ३९
२१	अस्यशुक्लदशम्यांदशावतारारब्धंव्रतं तस्यानुष्ठानविधिः तन्माहात्म्यंवर्णयितुंलीलाधरब्रह्मेतिहासः श्लोका:२४
२२	ऋषीणांश्राद्धकरणविषयेप्रश्नः तदुत्तरंकथयतासूतेनकथितः अगस्त्यादीनामितिहासः लक्ष्म्यादत्तोगस्त्यादीनांशापः श्लो० ३०
२३	एतेषांशापमुक्तिविषयेंऽबरीषपृष्टोनारदः तदुत्तरंकथयन् वातापील्वलेतिहासंक्रथयति· श्राद्धलोपाद्बुभुक्षितानांपितृणां अगस्तिप्रसादार्थंकृतापरिचर्या· प्रसन्नेगस्तौतत्कृतेरुपक्रमः श्लोकाः ३४
२४	पितृभिःकृताऽगस्तिस्तुतिः प्रसन्नयालक्ष्म्याद्वत्तोगस्त्यादीनांशापनोमुक्तिः श्लो· ३१
२५	अस्यश्रवणयुतद्वादश्यांश्रवणद्वादशीव्रतम् तस्यविधिः श्लोका:५२
२६	एतद्व्रतेतिहासविषयेब्रह्मणापृष्टोनारदः तत्रेतिहासंकथयति श्लोकाः ३७
२७	अस्मिन्मासेस्त्रीणांसौभाग्यवर्धकंकिंव्रतमितिपृष्टः सूतः गोत्रिरात्रिव्रतम् वक्तुंइंद्रद्युम्नपुलस्त्यसंवादंप्रस्तौतिः गोस्वरूपवर्णनम्· श्लो· २९
२८	अस्यव्रतस्यसविस्तरोविधिः श्लोका:३५
२९	अस्मिन्मासेस्नानमाहात्म्यकथनम् पुराणश्रवणमहिमा· तस्यविधिः फलंच·श्लोका:२६
३०	पौराणिकपूजनविधिः पुराणनिंदानिषेधः पौराणिकपूजानाअकरणेदोषाख्यानं श्लो· २२

इतिभाद्रपदमासमाहात्म्यस्यानुक्रमणिका समाप्ता·

श्रीगणेशायनमः ॥ श्रीगुरुभ्योनमः ऋषयऊचुः सूत त्वदीयवक्त्राब्जान्माहात्म्यंनभसःश्रुतम् नभस्यस्याधुना ब्रूहित्यद्वक्त्राच्छ्रवणेच्छ्रवः १ त्वत्समोनास्तिवैलोकेपुराणार्थविदांभुवि वयंपूताः कृतार्थाश्चत्वत्समागमनेनवै २ सूतउवाच शृण्वंतुऋषयःसर्वेकथयामिसमासतः सर्वमासाधिकोमासोभाद्रमासः समीरितः ३ अस्यमाहात्म्यश्रवणात्पूतोभवतिमानवः जन्मांतरीयपुण्येनमाहात्म्यश्रवणंभवेत् ४ तेधन्याःकृतपुण्यास्तेनपस्तेसंतुतेःसदा श्रुतंभाद्रस्यमाहात्म्यंजन्मनःसार्थकंकृतम् ५ नभस्योषसिस्नातस्ययत्पुण्यंजायतेभुवि तत्पुण्यंनाखिलैर्यज्ञैर्लभ्यतेक्रतपादिभिः ६ तस्मात्स्नानंचदानंचकार्यंभाद्रपदेसदा स्नानंतावत्प्रकर्तव्यंयावदुदितेरवौ ७ कार्यंभाद्रपदस्नानंयत्रकुत्र जलाशये तत्रसन्निहितागंगानात्रकार्याविचारणा ८ जलानिभाद्रमासेस्मिन्गर्जंतिचपुनःपुनः विश्वासघातिनंक्रूरंकृतघ्नंमातृगामिनम् ९ द्विजघ्नंपतितंस्त्रीघ्नंमद्यपंनिर्दयंशठम् अनेकदुर्व्यसनिनंपुनामीनात्रसंशयः १० तावद्भ्रूजंतिपापानिब्रह्महत्यासमानिच दृष्ट्वानभस्यसप्राप्तंविद्रवंतिइतस्ततः ११ प्रातःस्नानंकरिष्यामिनभस्येनियदावदन् तदानीमेवपापानिगमिष्यंतिशरीरतः १२ दृष्ट्वानभस्यंसंप्राप्तंव्याघ्रंदृष्ट्वायथामृगाः अस्मिन्मास्यकृतस्नानाह्यपदाःपशवःस्मृताः १३ जन्मजन्मांतरीयेनस्नानंभवतिकर्मणा अस्मिन्भवंतिविघ्नानिस्वल्पपुण्यवतांनृणाम् १४ स्नानदानचर्चायांपुराणेयत्तत्कर्मणि अत्रार्थंकथयिष्यामिइतिहासपुरातनम् १५ यदृच्छयासत्यलोकात्सर्यन्नारदोमुनिः स्मरन्गुणान्भगवतोत्यंबरीषगृहंययौ १६ पूजयामासपरयाभक्त्यातंनारदंमुनिम् दिव्यासनेसमासीनंप्रोवाचविनयान्वितः १७ धन्योहंकृतकृत्योहंत्वदीयागमनेनवै अधुनाब्रूहिमत्सश्चात्कलिदोषेणदूषितान् १८ पाखंडवादनिरतान्सर्वदानृतभाषणान्परदाररतान्दुष्टान्परद्रव्यापहारिणः १९ परस्यनिधनंदृष्ट्वाऽऽत्मानंचिरजीवनम् मन्यमानान्पापरतान्क्लेशदुःखसमन्वितान् २० जनान्दृष्ट्वाऽतिदीनेसंतापोजायतेमम केनोपायेनमुच्यंतेतमुपायंवदस्वमाम् २१

क्षिप्रप्रत्ययकर्तारमल्पायासंमहत्फलम् २२ इतिश्रीभविष्योत्तरपुराणेभाद्रपदमाहात्म्येप्रथमोऽध्यायः १ ॥

नारदउवाच शृण्वंबरीषराजेंद्रसर्वलोकोपकारकम् वक्ष्येमासस्यमाहात्म्यमिहामुत्रफलप्रदम् १ सर्वमासोनभोमाः
सः भाद्रमासःप्रकीर्तितः पितृभिःप्रार्थितोविष्णुः वरमस्मैप्रदत्तवान् २ अस्मिन्स्नानंचदानंचपुराणंहिजतर्पणम् अन्य
मासाच्छतगुणंभविष्यतिकलौत्वयि ३ अनेकवरसंयुक्तोगर्वेणमहतावृतः नमयासदृशःकोपित्रिषुलोकेषुविद्यते ४
सर्वान्पुनामिमनुजान्उत्तमाधममध्यमान् तद्गर्वपरिहारार्थंगोपितोयंस्वयंभुवा ५ अतःस्नानंचदानंचकर्तव्यंपापभीरु
भिः पुनात्येवनसंदेहोकलिकल्मषनाशनः ६ पापिनांबहुविघ्नानित्यास्मिन्मासेनसंशयः अत्रार्थेकथयिष्यामिइतिहा-
संपुरातनम् ७ पुरामाहिष्मतीपुर्यांक्षत्रियःशंबलाभिधः नत्सलीकमतीचासीत्भतृशुश्रूषणेरता ८ शंबलोधनस
पन्नःकृपणःक्षत्रियाधमः सर्वक्रियापरिभ्रष्टोक्रयविक्रयकारकः ९ अपुत्रोदैवयोगेनदेवब्राह्मणनिंदकः कालेनबहु
नाराजन्भाद्रमासःसमागतः १० तत्रस्थाःकेचनजनाःभाद्रस्नानार्थमुद्यताः बालास्त्रियश्चवृद्धाश्चस्नानार्थंकृतनिश्चयाः
११ कर्मतिःस्वामिनप्राहस्नानंकार्यत्वयापच श्रुत्वाविबुधकन्याभ्यान्माहात्म्यंस्नानतःकृतम् १२ मयापिक्रियतेस्वामिन्
त्वयाकार्यमहत्फलम् उभाभ्यांनिश्चयंकृत्वाप्रातर्गंतुंसमुत्सकौ १३ तस्मिन्नवसरेराजन्ज्वरार्तःशंबलोऽभवत् ततः
प्रतिदिनेतस्यस्नानात्पूर्वज्वरोभवेत् १४ पुराणावसरेसीतंशंबलस्यदुरात्मनः एवमासोगतस्तस्यदुर्बलस्यगतायुषः १५
कालेननिधनंप्राप्यजगामयममंदिरम् अनेकयातनांप्राप्यबुभुजेनरकंचिरम् १६ भुक्तशेषेणपापेनश्वानोभूत्क्षत्रिया-
धमः क्षुत्क्षामोनिर्बलोदुष्टःश्वानोभूदमलेपुरे १७ कालेनजरठोजातोसर्वांगक्षतसंयुतः जन्मांतरीयपुण्येनभाद्रमासः
समागतः १८ भाद्रेमासेसितेपक्षेगच्छन्नुदितरंवौ मांसपिंडमुखोऽकस्मात्पापात्तत्सलिलेपतत् १९ तदैवव्याकुलोजा
तोममारसलिलेयदा तेनैवदिव्यदेहोभूद्विमानंयानमंबरात् ॥२०॥परमाश्चर्यसंयुक्तःजन्मजन्मांतरंस्मरन् ॥ दूता-

ऊचुः त्वदर्थमिदमानीतंविमानंसमुपाविश २१ शंबलउवाच केनपुण्येनसंप्राप्तंविमानंतद्वदंतुमे अज्ञातभाद्र
स्नानोपिस्नानमाहात्म्यतःकिल सर्वपापविनिर्मुक्तोविमानेरोहुमर्हसि २२ विमानस्थोदिवंयातः शक्रसामीप्यमागतः अ
ज्ञातस्नानदानस्यफलंकोवेदतत्त्वतः २३ इतिश्रीभविष्योत्तरे पुराणेभाद्रपदमासमाहात्म्येद्वितीयोऽध्यायः २ ७
ऋषयऊचुः बालवैधव्यनिर्दग्धापुत्रशोकसमान्विताः दुर्भगादोषसंयुक्ताःपापकर्मरता स्तथा १ केनव्रतप्रभावेनमु
च्यंतेसर्वकिल्बिषैः प्राप्नुवंतिपरंसौख्यमिहलोकेपरत्रच २ तदाचक्ष्वह्यजश्रेष्ठलोकानुग्रहकाम्यया सूतउवाच
साधुसाधुमहाभागाऋषयोदीनवत्सलाः ३ इदमर्थंपुरापृष्टःकौरव्येणजनार्दनः कृष्णउवाच शृणुराजन्प्रवक्ष्या
मिस्त्रीणांमंगलहेतवे ४ व्रतंस्त्रीभिःसदाकार्यंगौरीमंगलसंज्ञकम् तस्यानुष्ठानमात्रेणसर्वदुःखात्प्रमुच्यते ५ युधि
ष्ठिरउवाच देवकेनविधानेनकदाकार्यमिदंव्रतम् एतत्सर्वंसमाचक्ष्वयदितेऽनुग्रहोमयि ६ श्रीकृष्णउवाच
भाद्रमासेसितेपक्षेतृतीयायांनरोत्तम प्रभातेविमलेस्नात्वाकृत्वानित्यविधिंनृप ७ मध्यान्हेपूजयेद्देवीं गौरीमंगलसं
ज्ञकाम् सौवर्णींराजतींवापिमृन्मयींसशिवांशुभाम् ८ पूजयेच्छुक्लमाल्याद्यैरुपचारैः पृथक्पृथक् पूजांतेद्विजवर्येभ्यो
दत्त्वादानान्यनेकशः ९ अशक्तोकेवलंदद्याद्दानंमंगलवायनम् वंशपात्रेसमादायकंचुकीवस्त्रसंयुताम् १० समुक्त
मंगलसूत्रंस्थापयेत्तदुपरि सर्वसौभाग्यसंयुक्तब्राह्मणायनिवेदयेत् ११ सौवर्णींदक्षिणांदद्याद्व्रतसंपूर्तिकाम्यया
नाश्नीयात्तद्दिनेकिंचिदशक्तःकंदमूलकम् १२ रात्रौजागरणंकार्यंगीतवादित्रमंगलैः प्रभातेपूजयेद्देवींसशिवांभक्तव
त्सलाम् १३ ब्राह्मणान्भोजयेच्छक्त्यास्वयंभुंजीनवाग्यतः एवंयाकुरुतेनारीन सादुर्गतिमाप्नुयात् १४ युधिष्ठिर
उवाच पुराकेनेहचरितंव्रतंमंगलसंज्ञकम् श्रीकृष्णउवाच पुराकृतयुगेराजन्वीरसेनोनृपोत्तमः १५ तस्यकन्या
सुचार्वंगीदेवसेनागुणान्विता हरदत्तेनसातन्वीदेवसेनानृपोत्तम १६ बुभुजेसकलान्भोगान्त्रिदशैरपिदुर्लभान् कदा

चिद्दैवयोगेनपूर्वकर्मविपाकतः १७ वैधव्यमगमत्साध्वीदुःखशोकसमन्विता परलोकगतेतस्मिन्हरदत्तेहिजन्मनि १८ बालपुत्रातुसानारीउवासकतिचिद्दिनान् एकदादिवसेसातुपतिदुःखेनदुःखिता १९ गृहीत्वाबालतनयंस्नानार्थंयमुनांगता प्रविष्टासलिलेबालसहितानृपकन्यका २० अकस्माज्जलवेगेननतयोर्विलयंगतः चकारशोकमतुलंहाहेतिव्यलपन्मुहुः २१ पपातधरणीपृष्ठेरंभायानहतायथा मिलिताःसेवकाःसर्वेतथानागरिकानराः २२ उत्थाप्यनीतास्वगृहेसांत्वयामासुरप्यलम् देवसेनापिकष्टेनसावधानातदाभवत् आहूयसकलान्विप्रान्ददौपशुधनानिच सर्वंत्यक्त्वाययौसाधीऋषीणामाश्रमंशुभम् २४ तथाश्रमसादृशेकौंडिन्यस्यमहात्मनः आश्रमःस्मरवदःसर्वक्लेशदुःखनिवारणः २५ ययौतमाश्रमपुण्यंदृक्षातमृषिपुंगवम् दंडवत्पतितोभूमौनोत्तस्थौभृशदुःखिता २६ कृपयाऋषिवर्येणाश्वासितास्वकरेधृता कासित्वमितिसापृष्टातयासर्वंनिवेदितम् २७ ऋषिणापिक्षणंध्यात्वातस्यादुःखस्यकारणम् पूर्वजन्मभवंतस्यैकथयामाससादरम् २८ ऋषिरुवाच पूर्वजन्मनिभोभद्रेक्षत्रियोमाधवाभिधः तस्यासिवल्लभानूनंभर्तृचित्तानुयायिनी २९ कृत्वादानान्यनेकानिव्रतानिविविधानिच नरुतंमंगलागौर्याःपूजनंव्रतमुत्तमम् ३० तेनकर्मविपाकेनदुःखितासिनृपात्मजे तद्दुःखपरिहारार्थंव्रतंकुरुममाज्ञया ३१ तथेत्युक्त्वाब्राह्मणीसाधृत्वातच्चरणोमुदा कृपार्द्रोमुनिवर्योसौस्वयंव्रतमुपादिशत् ३२ चकारव्रतराजंतंमुनेराश्रममास्थिता निमग्नोयमुनातोयेबालकोपिकुरूद्वह ३३ तदैवकन्याभिस्ताभिर्नागराजस्यभूतले पालितःपोषितश्चापितताभिःस्वपतिकाम्यया ३४ दशायौवनसंपन्नोरेमेताभिःसुरवेन्च विसस्मारनिजंसर्वंदिव्यभोगसमन्वितः ३५ मिलित्वानागकन्याभिःसंपृष्टोब्राह्मणोत्तमः कुतस्तेवदनम्लानंचिंताशोकोकुतस्तव ३६ कारणंकथयास्माकंकरिष्यामोथनिष्कृतिम् गृहीत्वाशपथंतस्मात्कथयामासकारणम् ३७ दत्वारत्नान्यनेकानिसेवकाबहुवस्तथा निष्कासितोजनात्तूर्णंद्विजोमणिप्रभावतः ३८ भ्रमतापप्रयोपुण्यंकौंडिन्यस्याश्रमंद्विजः मुनिंचमातरंनत्वा

स्ववृत्तांतमवेदयत् ३९ हर्षेणोत्फुल्लनयनात्र्आलिंग्यबालकंमुदा व्रतंमुनिप्रभावंचप्रशंसंतीमुहुर्मुहुः ४० मुनेराज्ञांगृहीत्वाथतनयेनसहाययौ उवासकतिचित्कालंनागलोकेमनोहरे ४१ भुक्त्वासौख्यान्यनेकानिस्नुषापुत्रैरलंकृता दिव्यदेहधराभूत्वादिव्यलोकमगात्सती ४२ भर्त्रासहैवशर्वस्यलोकेवासमवापसा एतत्तेकथितंसर्वमंगलागौरीव्रतं ४३ प्रभावंसेतिहासंचकिंभूयःश्रोतुमिच्छसि एवयाकुरुतेनारीनसादुर्गतिमाप्नुयात् ४४ इहभुक्त्वाखिलान्भोगान्त्र्अंतेशिवपुरंव्रजेत् कौमार्यपिचकर्तव्यंगौरीव्रतमनुत्तमम् ४५ तथैवपंचवर्षाणिविवाहोर्ध्वंनृपोत्तम प्रतिभौमेनभोमासिकार्यंसौभाग्यहेतवे ४६ नमोहात्कुरुतेनारीव्रतंसौभाग्यदायकम् वैधव्यपुत्रशोकत्वंप्राप्नुयाज्जन्मजन्मनि ४७ तस्मात्सर्वप्रयत्नेनकर्तव्यंस्त्रीभिरादरात् व्रतस्योद्यापनंकार्यंगौरीशंकरतुष्टये ४८ त्र्आदौमध्येतथाचांतेत्र्अब्देषोडशकेतथा सौवर्णींप्रतिमांकृत्वास्थापयेत्कलशोपरि ४९ त्र्अग्निंसंपूज्यविधिवत्होमंकृत्वाविधानतः ब्राह्मणान्भोजयेत्पश्चात्पुराणोक्तफलंलभेत् ५० कथाश्रवणमात्रेणसंपूर्णफलमश्नुते ५१ इतिश्रीभविष्योत्तरपुराणेभाद्रपदमासमाहात्म्येनारदाबरीषसंवादेमंगलागौरीनिरूपणंनामतृतीयोध्यायः ३ ऋषयऊचुः सौभाग्यदायकंब्रूहिव्रतमेतदनुत्तमम् स्कंदउवाच त्र्अस्यशुक्लतृतीयायांव्रतंसौभाग्यदायकम् १ हरिनालिकेतिविख्यातंयद्गौरीपृष्ठवान्शिवम् कैलासशिखरेरम्येगौरीपृच्छतिशंकरम् २ केनत्वंमयाप्राप्तस्तद्व्रतंब्रूहिशंकर शृणुदेविपुरंगुत्वव्रतानामुत्तमंव्रतम् ३ त्वयाकृतंतत्प्रभावात्प्राप्तमर्द्धासनंमम शृणुसर्वंत्वयादेवियद्व्रतंचरितंमहत् ४ पार्वत्युवाच कथव्रतमयाचीर्णंतत्सर्वंब्रूहिशंकर शंकरउवाच नवजन्मपुराजातंगौरीहिमवतोगृहे ५ तत्रत्वंपार्वतीबाल्येकुर्वतीचमहत्तपः श्रुत्वातातेनतेकष्टंदुःखितचिंतयान्वितः ६ कस्मैदेयामयाकन्यासएवंचिंतयावृतः इत्येवंचिंतयंस्तत्रब्रह्मपुत्रसमागतः ७ पूजयामासविधिवत्प्रच्छागमकारणम् नारदउवाच नगराजशृणुष्वेतं

विष्णुनाप्रेषितोस्म्यहम् ८ योग्ययोग्यायदातव्यंकन्यारत्नमिदंत्वया हिमवानुवाच वासुदेवसमोदेवोकन्यांप्रार्थयते यदि ९ तदामयाप्रदातव्यात्वदागमनकारणात् तच्छ्रुत्वानारदोविष्णुंतत्सर्वंकथयतीति १० गतेमुनिवरेतत्रकन्यामाहूयचाब्रवीत् दत्तासित्वंमयापुत्रिदेवायचक्रपाणये ११ तच्छ्रुत्वादुःखिताजानापतिताधरणीतले सख्यऊचुः किमर्थंदुःखितादेविवद्स्वत्वंममाग्रतः १२ कपर्दिनंतुभर्तारंकरिष्येहंनसंशयः इतिमोचिंतितंनित्यंतातेनकृतमन्यथा १३ तस्माद्देहपरित्यागंकरिष्येनात्रसंशयः सख्युवाच यद्यपितानजानातिब्रह्मत्वंमयाकृतम् १४ एवंसमंतं कृत्वानीतासित्वमह्वावने पितातेचिंतयामाससूच्छयापतितोभुवि १५ सत्यंकृतंमयापूर्वंकिंदास्येगरुडध्वजे त्वंगतासि वनघोरंव्रजत्यासखिभिःसह १६ वालुकाभिःकृतंलिंगंसखिभ्यासहपूजितम् भाद्रशुक्लतृतीयायांहस्तेसोम्ययुजित्वया १७ तत्रगीतेनवाद्येनरात्रौजागरणंकृतम् तद्व्रतस्यप्रभावेनआगतोहंनवांनिके १८ प्रसन्नोस्मिमयाप्रोक्तंवरंब्रूहिवरानने पार्वत्युवाच यदिदेवप्रसन्नोसिभर्ताभवमहेश्वर १९ तथेत्युक्तादेवीकैलासपुनरागता ततःप्रभातसमयेकृत्वाव्रतविसर्जनम् २० भ्रमन्गिरिंददर्शायकन्यांसुभाशुभाननाम् उत्थाप्योत्संगमारोप्यहिमवान्रुरुदेभृशम् २१ पार्वत्युवाच मांविष्णवेप्रदातासितेनाहवनमागता पुनरूचेगिरिर्गौरीमनोदास्यामिशूलिने २२ एवमुक्काहिमवतानीतासित्वंगृहप्रति व्रतराजप्रभावेन प्राप्तमर्द्धासनंमम २३ अलिभिर्हरितायस्मात्तस्मात्साहरितालिका पार्वत्युवाच नामेदंकथितंवायविधिंवदममप्रभो २४ ईश्वरउवाच भाद्रशुक्लतृतीयायांहस्तसोमयुजिप्रिये कर्तव्यंसुप्रसन्नेनस्त्रीभिःसौभाग्यवर्धनम् २५ मध्यान्हेतुनदीगंत्वास्नात्वाचैवविधानतः सतोरणांचनुद्वारांकदलीस्तंभमंडिताम् २६ पूजयेत्तत्रमात्वांचषोडशोपचारकैः सप्तधान्योपरिन्यस्यकलशंनाग्रमव्रण २७ तस्योपरिन्यसेत्वांचमाचैवं वालुकामयीवशापात्रयुगंकृत्वाद्वाभ्यांचैवायशक्तितः २८ सर्वसौभाग्यद्रव्यंचसिंदूरंकुंकुमंशुभम् करकर्णादिभूषाश्चस्त्रीभ्योद्द

द्यादयाविधिं २९ यावज्जीवंतुकर्तव्यंसौभाग्यादिविवृद्धये उपोष्यजागरंकुर्यात्पुराणश्रवणादिभिः ३० आहारंकु
रुतेनारीदुःखंस्याज्जन्मजन्मनि सप्तजन्मभवेद्वंध्याचैधव्यंचपुनःपुनः ३१ दारिद्र्यंपुत्रशोकंचकर्कशादुःखभागिनी पि
पीलिकत्वंमधुरान्नदुग्धात्भवतिसर्पिणी ३२ कर्कशाकंफलंतस्तृणधान्यात्तृणोपमा नारिकेलाशनाद्बोधाभवत्येवन-
संशयः ३३ भक्षणंनैवकर्तव्यंहरितालिव्रतेशुभे रात्रौजागरणंकुर्यात्प्रभातेपूजयेत्सुनः ३४ पारणंचप्रकर्तव्यंदिव्यान्नैः
ब्राह्मणैःसह इहलोकेसुखंप्राप्यअन्तेमोक्षोनसंशयः ३५ कथायाःश्रवणेनैवपुराणोक्तंफलंलभेत् वाजपेयसहस्रा
णिअश्वमेधशतानिच ३६ कथाश्रवणमात्रेणतत्फलंलभतेनरः सूतउवाच श्रुत्वेवंगिरिजाशंभोमाहात्म्यंपरमा
द्भुतम् ३७ चकारस्नानदानानिनभस्येशोकवर्जितम् तथैवचकारोद्यापनंचहरितालिका ३८ तस्यप्रभावात्सप्तानमर्द्धा
गंपार्वतीपतेः एवमन्यैश्चबहुभिःकृतंपापप्रणाशनम् ३९ ननस्तेमुनयःसर्वेसूतवाक्येनतोषिताः पुनःपप्रच्छतुः
र्वैचतुर्थीव्रतमुत्तमम् ४० इतिश्रीभविष्योत्तरपुराणेभाद्रपदमासमाहात्म्येचतुर्थीध्यायः ४ ७ ५८
ऊचुः अर्थसिद्धिःकथंनृणांपुत्रसौभाग्यसंपदः दंपत्योःकलहश्चैवबंधुभेदस्तथानृणाम् १ उदासीनेषुसर्वेषुकथं
सन्मुखतांभवेत् द्रव्यलाभःकथंनृणांवाणिज्येनकृषिस्तथा २ नृपतेःपुरचक्रस्यजयसिद्धिःकथंभवेत् इदंप्रश्नंमहाभा
गवदस्मत्पुरोग्रतः ३ सूतउवाच सन्नद्धयोःपुराविप्राःकुरुपाडवसेनयोः पृष्टवान्देवकीपुत्रं कुंतीपुत्रोयुधिष्ठिरः ४
युधिष्ठिरउवाच निर्विघ्नंजयोमत्स्यंदेवदेवकथंभवेत् कांदेवतांनमस्कृत्यसम्यक्राज्यंलभेमहि ५ कृष्णाउवाच
पूजयत्वंहिदेवेशमुमामलसमुद्भवम् तस्मिन्संपूजितेवीरध्रुवंराज्यमवाप्स्यसि ६ युधिष्ठिरउवाच कस्मिन्मासेप्र-
कर्तव्यंव्रतमेतत्सुदुर्लभम् श्रीकृष्णउवाच कुर्याद्भाद्रपदेशुक्लेचतुर्थ्यांपूजयेन्नृप यदाचोद्वहतेभक्तिस्तदापूज्यो-
गणाधिपः प्रातःशुक्लतिलैःस्नात्वामध्यान्हेदेवमर्चयेत् ८ स्वशक्त्यागणनाथस्यस्वर्णरौप्यमयाकृतिः अथवामृन्म

यींकुर्याद्दित्तशाठ्येनकारयेत् ९ कृत्वापूजांविधानेनस्नानंपंचामृतैःपृथक् वस्त्रंकौशेयकंरक्तंगंधंदद्याच्चभक्तितः १०
गणाध्यक्षेयनाम्नावैपूजयेत्तुविनायकम् विनायकायपुष्पाणिधूपंचोमात्मकायच ११ दीपंरुद्रप्रियायेतिनैवेद्यंविघ्ना
शिने नतोदूर्वांकुरान्गृह्यत्रिशतंचैकमेवच १२ पूजनीयप्रयत्नेनएभिर्नामपदैःपृथक् गणाधिपतमस्तेस्तुउमापुत्राय
नाशन १३ विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक एकदंतेभवक्रेतितथामूषकवाहन १४ कुमारगुरवेतुभ्यंपूजनीयःप्रय
त्नतः दूर्वायुग्मंगृहीत्वातुगंधयुक्तंप्रपूजयेत् १५ एकैकेनतुनाम्नावैदत्वैकंसर्वनामभिः आदौप्रणवमुच्चार्यनमोंताश्चप्र
कीर्तिताः १६ एकैकनामभिश्चैवदूर्वायुग्मंशभाननम पूजयेत्तरयाभक्त्यागणेशंसिद्धिदायकम् १७ अथैकविंशतिंकुर्या
त्मोदकान्घृतपाचिकान् स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन १८ दशविप्रायदातव्यादशचात्मनिभोजयेत् एवं
गणाधिपेदद्यात्रनैवेद्यंनृपोत्तम १९ सघृतंपायसंयुक्तंमोदकांश्चनिवेदयेत् पंचखाद्यपृथक्चैवशर्करायुतमर्पयेत्
२० गणेशःप्रतिगृण्हातिगणेशोवेददातिच गणेशस्तारकोभाभ्यांगणेशायनमोनमः २१ दीयतेगणनाथायप्रीयता-
मेगणाधिपः सोढव्यंसौमनसंनित्यंकरोतिगणनायकः २२ इतिमंत्रंसमुच्चार्यदद्याद्विजातये कृत्वानैमित्तिकं क-
र्मपूजयेदिष्टदेवताम् २३ ब्राह्मणान्भोजयेच्छक्त्याभुंजीयात्तैलवर्जितम् एवंकृतेधर्मराजगणनाथस्यपूजने २४
विजयस्तेभवेन्नित्यंसत्यंसत्यंवदाम्यहम् त्रिपुरंहंतिकामेनपूजितःशूलपाणिना २५ शक्रेणपूजितःसम्यक्तथावृत्रव-
धेनृप नलस्यान्वेषणेतद्वद्भयंत्याचपूजितः २६ रामदेवेनतद्वत्सीतामानयतापुरा दृष्ट्वासीतांमहाभागावीरेण-
चहनूमता २७ भगीरथेनतद्वंधेगंगामानयतापुरा अमृतोत्पादनार्थायसुरादेवासुरैरपि २८ अमृतंहरतापूर्ववैन-
तेयेनपक्षिणा आराधितोगणाध्यक्षस्त्वमृतंचानयद्बलात् २९ यदापूर्वंहिदैत्येन हृतोरुक्मिणिनंदनः आराधि
तोमयातद्वद्रुक्मिण्यासहितेनतु ३० कुष्ठव्याधियुतेनाथसांबेनाराधितःपुरा जयकामस्तथात्वंहितमाराधयशक

रम् ३१ प्राप्स्यसित्वंस्वकंराज्यंनात्रकार्याविचारणा सूतउवाच एवमुक्तस्तुकृष्णेनसानुजःपांडुनंदनः ३२ पूजांपप्रच्छ देवायगणेश पूजनेविधिः कःकार्यःपूजयेद्देवंगणेशं सिद्धिदायकम् ३३ एतन्मेब्रूहिविस्तीर्णंलोकानांहितकाम्यया श्रीकृष्णउवाच पूजयित्वामहाभागनाम्नासिद्धिविनायकम् ३४ सिद्ध्यंतिसर्वकार्याणिसततपूजयेदतः यत्रारंभेतुसंपूज्यः स्वासनेचउमास्कतः ३५ व्रतारंभेषुसर्वेषुपूजनीयोविनायकः कृषिप्रारंभसमयेकृषुकश्चप्रपूजयेत् सस्यवृद्धिर्भवेत्तस्यधनंप्राप्नोतिनिश्चितम् पुष्टिकामैस्तथास्त्रीभिःपूजनीयोगणाधिपः ३७ विद्याकामालभेद्विद्यांधनकामोलभेद्धनम् जयंतुजयकामस्तुपुत्रार्थीलभतेसुतम् ३८ पतिकामाचभर्तारंसौभाग्यंचस्त्रवासिनी विधवापूजयित्वातुवैधव्यंनाप्नुयात्पुनः ३९ एतद्वःकथितंसर्वंचतुर्थीव्रतमुत्तमम् पूजनंगणनाथस्यफलंचैवसुनिश्चितम् ४० इतिश्रीभविष्योत्तरपुराणेभाद्रपदमाहात्म्येऽंबरीषनारदसंवादेचतुर्थीव्रतकथनंनामपंचमोऽध्यायः ५ ६ नारदउवाच अस्यैवशुक्लपक्षस्यपंचमीऋषिसंज्ञिता तस्यानुष्ठानमात्रेणसर्वपापक्षयोभवेत् १ ऋतुदोषात्स्त्रियोमुक्तास्तथान्येचान्यदोषतः अंबरीषउवाच कीदृशीपंचमीब्रह्मन्कथंसाऋषिसंज्ञिता २ मुच्यतेपातकात्कस्मात्तत्रजोदोषसंभवात् नारदउवाच अज्ञानात्तुस्त्रियोवापिस्त्रीयाजातारजस्वला ३ उपस्पृशंतिभांडादीन्गृहकर्मणिसंस्थिता ४ प्राप्नोतिसामहत्पापंमृतावैनरकंव्रजेत् शृणुतत्कारणंयस्माद्दूजनीयारजस्वला ५ ब्रह्महत्यापुरायुक्तोवृत्रहत्वा महासुरम् पापेनमहतानाजन्पीडितोवृत्रहत्यया ६ ब्राह्मणंसमुपादायत्वात्मनःशुद्धिकारणात् शुद्धिं पूजयमासतदाशक्रपितामहः ७ देवैःसचिंतितोब्रह्मागणंध्यात्वाचकारवै शुद्धिंशक्रस्यराजेंद्र प्रत्यक्षांतरात्मना ८ विभज्यब्रह्महत्यांचचतुर्धाचचतुर्मुखः प्रक्षिप्यराजशार्दूलंचतुःस्थानेषुवैतदा ९ वन्हेःप्रथमज्वालायांवर्षाकालेनदीतृतीयेपर्वतानेचस्त्रीणामृतुषुपार्थिव १० अतोरजस्वलानारीपरित्याज्याविशेषतः ब्रह्मणःशासनाद्राजन्चतुर्वर्णेषु

सर्वदा ११ प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी तृतीयेराजकीप्रोक्ताचतुर्थेहनिसिद्ध्यति १२ अज्ञानात्ज्ञाननोचा-
पिसंपर्कात्पातकंचयत् चतुर्णामपिराजेंद्रयद्वृत्रवधसंभवम् १३ ब्राह्मणक्षत्रविट्शूद्रैःस्त्रीभिःकार्याप्रयत्नतः मा-
सिभाद्रपदेचैवशुक्लपक्षेतुपंचमी १४ कर्तव्यासाप्रयत्नेनसर्वपापैःप्रमुच्यते अंबरीषउवाच मुनेब्रूहिममाग्रेत्वं
माहात्म्यमिदमुत्तमम् १५ आदौकेनचिदाख्यातंसप्तर्षीणांव्रतंपरम् किंपुण्यंकिंफलंतस्यव्रतमाचरितस्यच १६
नारदउवाच अथान्योपिचराजेंद्रश्चातुर्वर्ण्यस्यपालकः तस्यदेशोभवेद्विप्रोवेदवेदांगपारगः १७ कृमित्रोनामविप्र
पिःसर्वभूतहितेरतः कृषिंकरोत्यसौविप्रःकुटुंबंपालयत्यसौ १८ तस्यभार्यासुकृसाध्वीचपतिव्रतपरायणा कदाचिद्दै
वयोगेनआगतात्ऋषिपंचमी १९ तस्मिन्नेवदिनेराजन्कृमित्रोवैपितुर्दिनम् भोज्यभूरिप्रदोविप्रोभार्यामनिजगादह
२० कृमित्रउवाच शृणुप्रियेतुमेवाक्यंक्षयाहश्चाद्यमत्पितुः २१ आमंत्रणंकरिष्यामिऋषीणांवनवासिनाम्
यास्यामिपरयाभक्त्यापितॄणांतृप्तिहेतवे २२ तथेत्युक्तोथविप्रोसौसंग्रामोयमुनातटे निमंत्रितास्तमुनयः पितॄनुद्दिश्य
भोनृप २३ संयोगोराजसःप्रायः तत्कालेतस्यभार्यया विस्मित्वासातदाराजन्पप्रच्छस्त्रीकदंबकम् २४ आर्याःकिंतु
मयाकार्यंपितृकार्येगृहेमम आमंत्रितास्तुभूदेवास्तेसर्वेस्वर्गगामिनः २५ वृथापाकंचसंजातंक्षयाहविफलंगतम्
मध्यान्हेभास्करेजातेकालेचकुतुपस्थिते २७ कृमित्र आगतोगेहमृषिवृंदेनसंयुतः ततःस्त्रीभिःसमाख्यातःसद्यः
स्नानंचकारसः २८ तदग्रेऋषयःपुत्राःक्षयाहेमुपागताः अन्नंचहविधरम्यंलेह्यभक्ष्यसमन्वितम् २९ ततश्चाहा
रमयेऋषयोदिव्यचक्षुषा रजःसंयोगसंस्पृष्टज्ञात्वातद्विजोत्तमम् ३० शापंदत्वातदासर्वेनिराशाःपितरोगताः
कर्मणःफलतः कालस्तस्मात्कालेनियोजितम् ३१ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमास-
माहात्म्येषष्ठोऽध्यायः ६ ७ अंबरीषउवाच किंचकारसकृमित्रोसौभार्ययादुःखितःप्रभो ऋषीणां

सांत्वनंकर्तुंगतस्तेषांतपोवनम् १ कृत्वाबहुदिनंतेषांसेवनंभक्तिपूर्वकम् ततस्तेमुनयःसर्वेशापोद्धारंददुःपुनः २ ऋ
षेत्वमष्टवर्षाणिभुंजीयनववल्लभा भूत्वापुत्रगृहेवासंकृत्वासर्वंस्मरिष्यसि ३ ततःप्राप्तेऽष्टमेवर्षेतवश्राद्धदिनेकिल
ततःसंपादितेपाकेक्षीरभांडेविषंफणिः ४ त्यक्त्वागच्छतिसासूनीतद्भाडमस्पृशाच्चदा ज्वलत्काष्ठेनतत्पृष्ठतत्पलोताडयि
ष्यति ५ तद्दोषान्नैवदास्यतिभक्षशून्यास्तवापिच तयोर्विवदतोर्वाक्यंवृषश्चान्यस्तवात्मजः ६ करोतुऋषिपंचम्या
व्रतंपापप्रणाशनम् तस्यपुण्यप्रभावेननवमुस्फिर्भविष्यति ७ एवंतद्वचनंश्रुत्वाब्राह्मणःस्वगृहंययौ ततःकालेनबहु
नानिजपाप नियोजितः ८ पंचत्वमागतासाध्वीनीतायमपुरींप्रति घातितायमदूतैश्चविविधैर्वधबंधनैः ९ ततःकर्म
क्षयोजातःश्वानयोनिमुपागता तस्याभर्तुःश्वानयोन्याःकालधर्मेणयोजितः १० स्वाम्यासपर्कदोषणबल्लीवर्दोबभूव
सः स्कमित्रस्यापिपुत्रोसौगुरुशुश्रूषणेरतः ११ स्कमतिर्नामधर्मज्ञोदेवतातिथिपूजकः तस्यतोषितराजन् ऋतुस
पर्कदोषतः१२तिर्यग्योनिमनुप्राप्तावुभौजातिस्मरौनृप स्कतरयच्चगृहेमाताजयश्रीश्चनर्कीतदा १३ उच्छिष्टभोजने-
जातास्मरतीपूर्वपातकम् स्कमित्रोपिपितातस्यशुनश्चैवनरेश्वर १४ नित्यंतांगलकर्षीचबल्लीवर्दोबभूवह पितुः
क्षयाहेसंप्राप्तेस्कमतिस्तुततोद्विजः १५ भार्याचंद्रवतीनामऽवाचश्रद्धयान्वितः श्वश्रूसंवत्सरदिनंपितुर्मेचारुहासि-
नि १६ भोक्तव्याब्राह्मणाश्चैवपाकसिद्धिर्विधीयतां चकारणाकसिद्धिंचसाभर्तुःशासनात्तदा १७ मुक्तंपायस-
भांडेचसर्पेणगरलंनृप दृष्ट्वाब्रह्मन्यधाद्धीताशुनीभांडंतदास्पृशत् १८द्विजभार्याचतांदृष्ट्वाऽल्मूकेनचताडिता भो
जिताब्राह्मणास्तेनश्राद्धंकृत्वाविधानतः १९ ततोभुक्तेषुविप्रेषुनोच्छिष्टेचतदाबहिः निक्षिप्यचैवपात्राणि स्ना-
त्वाभूमौहतंचयत् २० विस्मितायास्तदाशून्याऽपवासस्ततोभवत् ततोरात्र्याप्रवृत्तायांसाशुनीक्षुधिताभव-
त् २१ बल्लीवर्दंसमागत्यभर्तारमिदमब्रवीत् अहंबुभुक्षितानाथनदत्तंभोजनंमम २२ ग्रासादिकंनदत्तंवैक्षुधा

पीड्यतेभृशम् अथप्रत्याब्दिकेप्राप्तेनकिंचिदशितंमया २३ पायमात्रेपपानाथगरलंसर्पसंभवम् मयाविचिंतितमि
दंमरिष्यंतिह्यजातयः २४ संस्पृष्टपयसोदोषाद्धाहंताडिताश्रुं दुःखितातेनमेगात्रंकटिभग्नाकरोमिकिं २५ ततः
प्राहबलीवर्दोभद्रेत्वत्पापजंफलम् किंकरोम्यसमर्थोसौभारवाहोचसर्वथा २६ अथाहमात्मजक्षेत्रेभ्रामितःसक
लंदिनम् वाहितोप्यात्मजेनाहंमुरवंबध्वाबुभुक्षितः २७ वृथाश्राद्धकृतंतेनहाजातामममकृता पुत्रदानादहंतृप्ता
नत्वदृनिमुपागता २८ तयोःसंवदतोरेवंमातापित्रोर्महीभृतः श्रुत्वावाक्यंतदापुत्रोयदुक्तंचतदांतयोः २९ माता
पित्रोश्चमुक्त्यर्थंसतदाप्रस्थितोवने गच्छन्ऋषीन्प्रतितदाकृमतिर्वदतावर ३० ददर्शचाश्रमंपुण्यंगंगानदसमीपग
तंगत्वातानृषीन्ऋषीश्वपरमेष्ठिनः ३१ प्रणिपत्याब्रवीद्वाक्यंहितंचैवतदांतयोः कृमतिरुवाच कथ्यतां
ब्रह्मऋषयःप्रश्नमेकंसमाहितः ३२ केनकर्मविपाकेनपितामाताकुयोनिषु एनामवस्थांसंप्राप्तौमुच्यतेपातकात्कथम्
३३ ऋषयऊचुः नवमातापुराविप्रस्वगृहेबालभावतः ऋतुकालंविदित्वातु भाडार्दान्संस्पृशत्तदा ३४ तेनक
र्मविपाकेनशूनोयोनिमुपागताः सतत्सपर्कदोषेणबलीवर्दोबभूवह ३५ एतयोर्मुक्तिकामार्थेकुरुत्वंऋषिपंचमीम
सकलंत्वस्तदाविप्रऋषीन्संपूज्ययत्नतः ३६ एवकृतेतुविप्रेंद्रऋषिपंचमिसंज्ञिके मोक्षिनौपितरौपापात्पूर्वजन्म
निचार्जितात् ३७ शाकाहारस्तुकर्तव्योनाचारश्यामिकापिवा ३८ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवा
देभाद्रपदमासमाहात्म्येसप्तमोऽध्यायः ७ ६ अंबरीषउवाच कदाकार्यमिदंब्रह्मन्व्रतंपरमदुष्करम्
नारदउवाच प्राप्तेभाद्रपदेमासेशुक्लपक्षेचपंचमी १ व्रतंतुऋषिपंचम्यांकर्तव्यंतुर्हिजोत्तम ऋतुसंपर्कजं-
दोषंक्षयंयातिनसंशयः २ भाद्रेमासिसितेपक्षेपंचम्यांनियतस्थितः प्रत्यूषेऋषिपंचम्यांदंतधावनपूर्वकम् ३ नद्यांवा
पितडागेवाशुचौदेशेगृहेपिवा मध्यान्हेचैवसंप्राप्तेमंडलंगोमयोदकैः ४ निधायविविधैःशुभ्रैःस्वस्तिकाद्यैर्मनोहरैः

संस्थाप्यब्राह्मणान्समशक्त्यापूजयेद्द्विज ५ स्वर्णरौप्यमयावापिनदभावेकुशात्मकान् कश्यपोभिर्भरद्वाजोविश्वामित्रोथगौतमः ६ जमदग्निर्वसिष्ठश्चसंस्थाप्यास्तत्प्रयत्नतः तच्छ्रुत्वाकर्मनिर्वाक्यंभाषितमृषिभिस्तदा ७ इतिश्रुत्वानुपितार्थमुक्त्यर्थंतुतदातयोः गृहंगत्वाव्रतंचक्रेसभार्यःश्रद्धयान्वितः ८ व्रतंनुऋषिपंचम्यासर्वपापप्रणाशनम् ऋषीणावचनात्ताभ्यायथोक्तव्रतमुत्तमम् ९ विधानार्थंचसंप्राप्यमातापित्रोःफलंददौ व्रतपुण्यप्रभावेनमातातान्श्वयोनितः १० मुक्तातुराजशार्दूलविमानवरमाश्रिता दिव्यांबरधराभूत्वागतास्वर्गंमहीपते ११ पितासोपिततोवेगान्मुच्यतेपशुयोनितः स्वर्गप्राप्तोमहाराजव्रतस्यास्यप्रभावतः १२ एवमेकस्यमासस्यदिनस्यगदितंफलम् किंपुनःपूर्णमासस्यकथयामिशुभंफलम् १३ अतःसर्वप्रयत्नेनकुरुमासव्रतंशुभम् ब्रह्महत्याचतुर्भक्तात्यक्तास्थानचतुष्टये अन्नोजलेगिरौस्त्रीषुयात्यक्ताब्राह्मणापुरा तस्याःसपर्कमात्रेणब्रह्महाजायतेनरः १५ तस्मात्सर्वप्रयत्नेननरैःकार्यातुपंचमी पुरामहीपुरेराजन्क्षत्रियोमाधवाभिधः १६ पुत्रैश्चतुर्भिःसंयुक्तःकदाचिद्दैवयोगतः मृदाग्निःकफसंपन्नोत्यधःकुष्ठयुतःसदा १७ एवंतेरोगयुक्ताःस्युःपूर्वकर्मस्वभावतः तान्दृष्ट्वाशोकसंपन्नःक्षत्रियःपर्यचिंतयत् १८ पूजाव्रतानिबहुशःश्रौषधानिबहून्यपि ददावपिगुणस्तेभ्योनययौद्विजपुंगवः १९ एवंमत्रविदःसर्वेतथायंत्रविदश्चये भिषग्वराभूतविदोद्रव्यैःसंतोषिताश्चापि २० प्राणशेषाःसमभवन्सर्वेतेनिधनोन्मुखाः तान्दृष्ट्वासाधवात्यर्थंमुद्विग्नात्यभवत्तदा २१ प्रेतभूतान्गृहीत्वातुरेवातीरमुपाविशत् तत्रापिदैवयोगेनकौंडिन्यःसमुपागतः २२ तंप्रणम्यनिजदुःखंकारणंपर्यपृच्छत कैनकर्मविपाकेनरोगिणस्तनयामम २३ तदस्यकारणंब्रूहिनिष्कृतिंचापिसर्वशः कौंडिन्यउवाच ज्ञात्वासमाधिनासर्वंकथयामासकारणम् २४ अहोतेतनयाःपूर्वंब्राह्मणाःकामचारिणः कुर्वंतिचैवकर्माणिकथयामिसविस्तरम् २५ अधोयंसर्वदानिष्ठपर्वताग्रेनिजेच्छया रजस्वलास्त्रियासक्तःकुष्ठ्ययंतनयःपुरा २६ अन्ने

प्रथमज्वालायांहोमंकुर्वन्दिनेदिने मंदाग्निस्तेनपापेनजातोयंतनयस्तव २७ वर्षाकृयेनकुल्यायांदृष्टिपातेजलाशा- मासस्त-४
ये तेनपापेनजातोयंकफयुक्त स्तवात्मजः २८ एक्वतुर्भिस्तैर्दोषैर्ब्रह्महत्यासमुद्भवैः व्याप्तास्तेनिरयान्भुक्त्वातोज भाद्रपदमा-
नास्तवात्मजाः २९ भुक्तावशेषदोषेणरोगयुक्तास्तकेभवन् अतस्तत्कर्मभोगस्यमुक्तयेव्रतमुत्तमम् ३० व्रतंकुरुऋषि अ- ८
पंचम्यांतेनकार्यंभविष्यति यातेमुनिवरेतस्मादागताऋषिपंचमी ३१ पुत्रेभ्यःकारयित्वासौयथाशक्त्यायथाविधि
तस्यपुण्यप्रभावेनरोगमुक्तास्तकेभवन् ३२ नारदउवाच एवंबहुभिराचीर्णंपंचम्यांव्रतमुत्तमम् नवदामिकु-
थातेषांग्रथोबाहुल्यमावजेत् ३३ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येअष्टमो-
ऽध्यायः ८ ५ नारदउवाच अत्रैवान्यद्व्रतंकार्यंभाद्रव्रतपरायणैः नागव्रतंतिविख्यातंसर्वनागभयापहम्
१ नतेषांजायतेबाधाविषसर्पसमुद्भवा अंबरीषउवाच यात्वयाकथिताब्रह्मन्पंचमीनागसंज्ञिका २ सेतिहा
संविधानंतत्कथ्यतामृषिसत्तम नारदउवाच चतुर्थ्यांएकभुक्तंतुतस्यानक्तंप्रकीर्तितम् भूरिचंद्रमयनागंत्र
वाकलधौतजम् ३ कृत्वादारुमयंवापित्र्यथवामृन्मयेप्रिय ४ पंचम्यामर्चयेद्भक्त्यानागंपंचफणंस्मृतम् करवीरैर्जा-
तिपुष्पैः शतपत्रैश्चपद्मजैः ५ तथागंधैश्चधूपैश्चपूजयेन्नागमात्रकम् ब्राह्मणान्भोजयेत्पश्चात्घृतपायसमोदकैः
६ अनंतवासुकिंशेषपद्मकंबलमेवच तथाकर्कोटकंनागंनागमश्वतरंतथा ७ धृतराष्ट्रंशंखपालंकालियंतक्षकंत
पिंगलंचमहानागंभाद्रेमासिप्रकीर्तिनाः ८ व्रतस्यांतेपारणंस्यात्क्षीरैर्ब्राह्मणभोजनं सुवर्णभारनिष्कंनागंदद्या
द्गुरवेतथा ९ तथावस्त्राणिदेयानिन्यासायामिततेजसे एवंसंपूजयेन्नागान्सदाभक्त्यासमन्वितः १० कुर्याद्द्वादश
वर्षंतुपंचम्यांतुवरानने एवंकुर्वंतियेभक्त्यानागानांव्रतमुत्तमम् ११ नतेषांसर्पजाबाधाभविष्यतिकदाचन नारद ९
उवाच अत्रैवसर्पदष्टानांमुक्त्यर्थंव्रतमाचरेत् १२ तदेवाहंप्रवक्ष्यामिसंक्षेपेणयथातथ अंबरीषउवाच नाग

दष्टोनरोराजन्प्राप्यमृत्युंव्रजत्यधः १३ अधोगत्वाभवेत्सर्पोनिर्विषोनात्रसंशयः नागदष्टपितायस्यभ्रातावादुहितापि
वा १४ मातापुत्रोथवाभार्याकर्तव्यंतइदंत्वमे मोक्षायतस्यविप्रेंद्रदानंव्रतमुषोषणम् १५ ब्रूहिमेद्विजशार्दूलयेन-
दोषात्प्रमुच्यते नारदउवाच उपोष्यापंचमीसम्यक्नागानाबलवद्भवेत् १६ स्कमकमेकयावत्रद्विधानंशृणुभारत
मासिभाद्रपदेराजन्शुक्लपक्षेतुपंचमी १७ साभिपुण्यतमाप्रोक्तात्र्यात्यासर्वेस्तुकाम्यया चतुर्थ्यामेकभुक्तंचतस्यां
नक्तप्रकीर्तितम् १८ कुर्याच्चांद्रमसंनागमथवाकलधौतजम् अथदारुमयंभाव्यमृन्मयंवाथशक्तितः १९ पंचम्याम
र्चयेद्भक्त्यानागंपंचफणंतथा करवीरैस्तथापद्मैर्जातिपुष्पैःसुगंधिभिः २० गंधपुष्पैःसनैवेद्यैःस्नाप्यक्षीराब्धिभि-
ब्राह्मणान्भोजयेत्पश्चा दन्नपायसमोदकैः २१ अनंतंवासुकिंशेषपद्मंकंबलमेचच तथाकर्कोटकंनागंनागम-
श्वतरंनृप २२ धृतराष्ट्रंशंखपालंकालीयंतक्षकंतथा पिंगलंचतथानागंमासिभाद्रपदेक्रमात् २३ पूजयित्वाप्रयत्ने-
नपंचम्यानक्तभुग्भवेत् एवंद्वादशकृत्वावैमासिभाद्रपदेनृप २४ वत्सरांतेयथाशक्त्यामहाभोज्यंतुकारयेत् ब्राह्मणान्
यतीनांचनागानुद्दिश्यभक्तितः २५ इतिहासविदेनागकांचनंरत्नचित्रितम् गांचदद्यात्सवत्सांवैसर्वोपस्करसंयुताम्
२६ दानकालेपठेदेतत्स्मरन्नारायणंविभुम् सर्वागसर्वधातारमनंतमपराजितम् २७ येकेचिन्मेकुलेःसर्पादष्टाःप्रा-
प्तात्र्यधोगतिम् व्रतेनानेनगोविंदमुक्तिभाजोभवंतुनः २८ इत्युच्चार्याक्षतेर्युक्तंसितचंदनमिश्रितम् वारुदद्याग्रतोभू
यतोयतोयेयनिक्षिपेत् २९ अनेनविधिनासर्वेपरमेष्यंतिवामृताः सर्पतस्तेभियाष्यंतिस्वर्गतिंनृपसत्तम ३० कृत्वा
सर्वान्समुद्धृत्यकुलजान्कुलनंदन प्रयातिविष्णुसाभिध्यसेव्यमानोप्सरोगणैः ३१ वित्तशाठ्यविहीनोयंसर्वमेतत्फ-
लंवेत् नक्तंचभक्तिसहिताःसितपंचमीषुयेपूजयंतिभुजगान्कुसुमोपहारैः ३२ तेषांगृहेष्वभयदाहिभवंतिसर्पादर्पा
वतामणिमयूरविभाषितानागाः ३३ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादे भाद्रपदमासमाहात्म्येनवमोऽ

ध्यायः ९ ७ सूतउवाच शक्लस्येवतथाषष्ठ्यांललिताचैवपूजयेत् स्त्रीभिः सौभाग्यकामार्थेपुत्रपौत्रवि
वृद्धये १ कथयामिसमासेनविधानंविधिपूर्वकम् कृष्णेनकथितंपूर्वंकृष्णायेदुःखमुक्तये २ तदेतत्कथयिष्यामिशृणु
ध्वंमुनिसत्तमाः श्रीकृष्णउवाच भाद्रेभाद्रपदेमासिशक्लषष्ठ्यांसंयुता ३ नारीस्नात्वाप्रभातेतुशक्लमाल्या-
बरप्रिया स्ववेषाभरणोपेताभूत्वासंगृह्यवालुकाम् ४ आनीयवेशपात्रेतुपंचपिंडाकृतिंशुभाम् ध्यात्वातुललितां
देवींततोवननिवासिनीम् ५ पंकजंकरवीरंचनेपालीमालतींतथा एकैकाशतमात्यमष्टाविंशतिरेववा ६ भक्ष
तांकलिकागृह्यताभिर्देवींसमर्चयेत् प्रार्थयेदग्रतोभूत्वादेवीतांगिरिशप्रियाम् ७ ललितेललितेदेविसौख्यसौ ।
ग्यदायिनी त्वनतंदेहिसौभाग्यंभगवत्यपरावरम् ८ मंत्रेणानेनकुंकुमेश्वंपकैश्वस्वशोभनैः एवमभ्यर्च्यविधिना-
नैवेद्यपुरतोन्यसेत् ९ विविधैरपिकूष्मांडनारिकेलैःसदाडिमैः बीजपूरैःसतुंडीरैःकारवेल्लैःसुशोभनैः १० फलैस्त
त्कालसंभूतैःकृत्वाशोभांतदग्रतः विरूढैर्धान्यसंभूतैर्दीपालीभिःसमंततः ११ सार्धसगुणकैर्धूपैःसोलालकंकरं
जकैः गुडपुष्पैःकर्णवेष्टैर्मोदकैरुपमोदकैः १२ बहुप्रकारैर्नैवेद्यैर्यथाविभवसारतः एवमभ्यर्च्यविधिवद्रात्रौजाग
रणंचरेत् १३ गीतवाद्यैर्नटंनृत्यैः प्रोक्षणीयैरनेकधा सखीभिःसहितासाध्वीतांरात्रींप्रशमंनयेत् गंधपुष्पैरथाभ्य-
र्च्यगीतवाद्यपुरःसरः १४ तच्चदद्याद्द्विजेंद्रायनैवेद्यंहिनरोत्तमे स्नात्वाप्रहसमागत्य हुत्वावैश्वानरंक्रमात् १५ दे
वान्पितॄन्मनुष्यांश्चपूजयित्वास्ववासिनीम् कन्यकाश्चैवसंभोज्याब्राह्मणान्दशपंचच १६ भक्ष्यभोज्यैर्बहुविधैर्दं
त्वादानानिभूरिशः ललितामुस्कसंप्रीताइत्यक्त्वातुविसर्जयेत् १७ यः कश्चिदाचरेदेतद्व्रतंसौभाग्यदंपरम् ल
लितासप्तसप्तचसर्वपापनिबर्हणम् १८ नरोवार्यदिवानारीतस्यपुण्यफलंशृणु यत्तुलभ्यंव्रतैश्चान्यैर्दानैश्चानृपस १०
त्तम १९ नणोभिर्नियमैर्वापितदेतेनेहलभ्यते इहचैवातुलांसंपत्सौभाग्यमनुभूयते २० कृत्वामूर्ध्निपदंपार्थस

पत्नानांयशस्विनी मृताशिवपुरंप्राप्यसाकुटुंबेनरुद्रता २१ प्राप्नोतिदर्शनंदेव्यामयानुसहमोदते पुण्यसौख्यादिहा
गत्यसर्वसौख्यंचविंदति २२ साक्षात्त्रेतायुगेनारीसीतेवप्रियवल्लभा इदंयःशृणुयात्पार्थपठेद्वासाधुसंसदि २३ सो
पिपापविनिर्मुक्तःशिवलोकेमहीयते षष्ट्यांवत्सरांतरगतावरवशपात्रेसंपूजयित्वासिकतांक्रमेण नक्तंचजागरम-
नुव्रतवेषशीलाकुर्यादसौत्रिभुवनेललितेवभाति २४ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपद
मासमाहात्म्येदशमोऽध्यायः १० ५ सूतउवाच भाद्रेमासिसितेपक्षेकृत्वानित्यविधिंव्रती पूज
येत्सरय्याभक्त्यासोमचंद्रनिर्मितम् १ एतद्भूतंपुराकेनकृतंकेनप्रकाशितम् एतद्भूतप्रभावेनसंततिस्थिरजीविनी २
ऋषयऊचुः एतत्सविस्तरंब्रूहिनद्भ्राच्छ्रवणेप्सवः सूतउवाच अत्रार्थेधर्मराजेनस्मृत्वाकृष्णोब्रवीदिद
३ श्रीकृष्णउवाच मुनींद्रोलोमशोनाममथुरायागतःपुरा सोर्चितोवसुदेवेनदेवक्याचयुधिष्ठिर ४ उपविश्य-
कथापुण्याकथयित्वामनोरमा। ततःकथयितुंभूयःकथामेतामचक्रमे ५ कंसेनतेहताःपुत्राःजाताजाताःपुनःपुनः
मृतवत्सादेवकीत्वपुत्रदुःखेनदुःखिता ६ यथाचंद्रमुखीदीनाबभूवनहुषप्रिया यस्माच्चीर्णव्रतेचैवभूयादक्षय्यव-
त्सका ७ त्वमपिदेवकीतथाभविष्यसिनसंशयः देवक्युवाच कासाचंद्रमुखीब्रह्मन्बभूवनहुषप्रिया ८ किं
चीर्णंहितयादिव्यंव्रतंसंततिवर्द्धनम् सपत्नादर्पदलनंसौभाग्यारोग्यदंविभो ९ लोमशउवाच अयोध्याया
पुराराजानहुषोनामविश्रुतः तस्यासीद्रूपसंपन्नादेवीचंद्रमुखीप्रिया १० तथातत्रैवनगरेविष्णुगुप्तोभवद्द्विजः श्रा
सीद्गुणवतीतस्यपत्नीभद्रमुखीतथा ११ तयोरासीदतिप्रीतिस्पृहणीयापरस्परम् अथतेहूपिसख्यैवस्नानार्थं-
शरयूजले १२ प्राप्तेप्राप्ताश्चतत्रैवबह्वयोनगरांगनाः नाःस्नात्वामंडलंचक्रुःतन्मध्येव्यक्तरूपिणम् १३ लेखयि-
त्वाशिवंशांतमुमयासहशंकरम् गंधपुष्पाक्षतैर्भक्त्यापूजयित्वायथाविधि १४ प्रणम्यगंतुकामास्ताःपप्रच्छुश्च

वरस्त्रियः नाऊचुः शिवदःशंकरोस्माभिःपार्वत्यासहपूजितः १५ बध्वासूत्रमयंतंतुं शिवस्यात्मानिवेदितः १६
धारणीयमिदंतावत्पावत्साणविधारणम् नासांनहूचनंश्रुत्वा सख्योचेमेपिदेवकि १७ श्रुत्वानुसमयंतत्रबध्वादोर्भ्यो
नुदोरकम् ततस्ताश्चगृहजग्मुःस्वसखीभिः समावृताः कालेनमहतातस्यास्तद्व्रतंविस्मृतंरुभम् १८ चंद्रमुख्याः
प्रमत्तायाविस्मृतःसतुदोरकः भद्रमुख्यास्तथाभद्रेविस्मृतसर्वमेवतत् १९ मृताकैश्चिद्होरात्रैःसाबभूवपवंगमी
भद्रारव्याकुक्कुटीजाताव्रतभंगाच्छुभानने २० संभूयभूयसमयंप्राग्व्रतंचक्रतुःसह कालेनपंचतांप्राप्तसव ।व।
सहेवने २१ अदेवमातृकेदेशेजातेपिकुलसंमते ब्राह्मणीब्राह्मणीजातायासाभद्रमुखीपुरा २२ ईश्वरोजातम-
हिषीयासीच्चंद्रमुखीपुरा नाम्नाभद्रमुखीयासीत्भूषणानामसाभवत् २३ अनग्निकस्यभार्यासीद्रात्तस्यपुरो-
धसः अतीववल्लभाचासीत्भूषणाभूषणप्रिया २४ तस्याबभूवुरष्टौचपुत्रास्सर्वगुणान्विताः पुनर्निरंतराप्री। ।पो
रासीद्यथापुरा २५ मध्यवयसिरात्रीचपुत्रमेकंप्रजीजनत् ईश्वरीरोगिणंमूकंनेत्रहीनरुजागृहम् २६ नादृशोपिम
हाभागमृतोसौनवचार्षिकः ततःसाभूषणाद्रष्टुंईश्वरीपुत्रदुःखितां २७ सख्याभावादतिस्नेहात्पुत्रैः स्वैःपरिवारिता
अमुक्ताभरणान्नित्यंस्वरूपेणैवभूषिता २८ तांदृष्वातादृशींभव्यांप्रजज्वालेश्वरीरुषा ततोगृहंप्रषयित्वाब्राह्मणीतीव्र-
मत्सरा २९ चिंतयामाससाशीघ्रंतस्याःपुत्रवधंप्रति निश्चित्यचेतसाकुद्धाप्यानयामासतत्सुतान् ३० हताहता
श्चतेपुत्राःपुनर्जीवंसमागताः ३१ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येएकादशो-
ऽध्यायः ११ ॐ ऋषयऊचुः ततःकिमकरोद्रात्रीदृष्वापुत्रान्सजीवितान् केनैतेजीविताःसूततत्स
र्वंकथयस्वनः १ सूतउवाच तदद्भुततरंदृष्वासापिचाहूयभूषणाम् उपविश्यासनेश्रेष्ठे बहुमानपुरःसरम् २ ११
अपृच्छद्विस्मयाविष्टासाराज्ञीनृपवल्लभा ब्रूहितथ्यमहाभागे किंत्वयासुकृतंकृतम् ३ येननेनिहताःपुत्राःपुनर्जीवं

त्यनामयाः जीवद्वत्साबहुसुताक्षय्यभूषणशालिनी ४ किमाचरसिकल्याणीनत्सर्वंकथयस्वमे भूषणोवाच शृ-
णुदेविप्रवक्ष्यामिजन्मांतरविचेष्टितम् ५ किंतद्विस्मृतंसर्वंत्वयोध्यायांकृतंहियत् आचाभ्यांव्रतवैकल्यंप्रमत्ताभ्यांव
राने ६ येनत्वमकटीजाताजानाहंकुक्कुटीतथा तथाचव्रतवैकल्यंत्वयाचापत्यतःकृतम् ७ मयातुसर्वभावेनचेतसा
ऽध्यायशाकरम् तथाभाद्रपदस्नानव्रताचरणमुत्तमम् ८ एतद्विकारणंभद्रेनान्यत्किंचित्करोम्यहम् लोमशउवा
च इत्याकर्ण्यवचस्मृत्यपूर्वजन्मविचेष्टितम् ९ ईश्वरीचतयासार्द्धंपुनः सम्यक्चकारह व्रतस्यास्यप्रभावेनपुत्र
पौत्रादिसंभवम् १० भुक्त्वासौख्यमतुलमंतेशिवपुरंगता तस्मात्त्वमपिकल्याणीव्रतमेतत्समाचर ११ आरब्धेऽस्मि
न्व्रतेदिव्येजीवत्पुत्राभविष्यति देवक्युवाच ब्रह्मन्माख्याहिमेसम्यक्व्रतमेतत्करवप्रदम् १२ संतानवृद्धिक
रणंसमानायुष्यवर्द्धनम् लोमशउवाच भद्रेभाद्रपदेमासिसम्यग्यासलिलाशये १३ स्नात्वाशिवमंडलकेस्त्रवयिवा
सहांबिकाम् संपूज्यैकादशैःसूत्रैःर्युतंतंदृढव्रतम् १४ सौवर्णराजतंवापिसौत्रंवाधारयेत्करे मंडकान्वटकान्
शाकान्मासेपक्षेयवाद्विजा १५ स्वयंताश्चैवभोक्तव्याःव्रतभंगभयाच्छुभे प्रतिमासंतुसम्यग्यांशुक्लपक्षेविशेषतः
१६ पूजांतेवाणकंदद्यान्ब्राह्मणायकुटुंबिने धारिकामुद्रिकाब्राह्मीहेमीरूप्यास्वशक्तितः १७ ताम्रपात्रोपरि
स्थाप्यब्राह्मणेभ्योनिवेदयेत् आचार्यायविशेषेणसुवर्णस्यांगुलीयकम् १८ पुष्पकुंकुमसंयुक्तेस्तांबूलान्जन
सूचकैः एतत्तेसर्वमाख्यातंव्रतसंतानवर्धनम् १९ कुरुदोषप्रयत्नेनजीवद्वत्साभविष्यसि श्रीकृष्णउवाच
इत्युक्त्वातुमुनिश्रेष्ठस्तत्रैवांतरधीयत २० चकारसर्वंयत्नेनयदुक्तंतेनधीमता व्रतस्यास्यप्रभावेनदेवकीमामजीजन
त् २१ तत्माप्यर्थनरैःसम्यक्सुखसंततिवर्द्धनम् एवंयःशृणुयाद्भक्त्यायश्चैतत्प्रतिपादयेत् २२ व्रतमाख्यानस-
हितंसोपिपापैःप्रमुच्यते २३ व्याख्यानकव्रतमिदंसुतसौख्यकामायास्त्रीकरिष्यतिशिवंत्वदयेनिधाय दुःखंविहा

यबहुशाः कृतकल्मषोद्यान्सास्त्रीव्रताद्भवतिशोभजीववत्सा २४ स्वर्णमुक्ताप्रवालानिन्यामुक्ताभरणानिच एषां-
दानानिदेयानिव्रतसंपूर्णहेतवे २५ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादे भाद्रपदमासमाहात्म्ये द्वादशो
ऽध्यायः १२ ऋ अंबरीषउवाच मृतवंध्यातुयानारीकाकवंध्यानयापरा गर्भस्रावाऋतुमतीनानादो
षैश्चदूषिता १ कर्मणाकेनमुच्येतनद्वूतंब्रूहिमेमुने नारदउवाच मासिभाद्रपदेसम्यक्सम्यक्स्नात्वायथा
विधि २ तस्यैवशुक्लसप्तम्याज्येष्ठयोगेप्रपूजनम् रात्रौजागरणंकुर्यात्गीतवाद्यैर्निःस्वनैः ३ त्वंलक्ष्मीत्वमुमा
देवीत्वंज्येष्ठसर्वदामरैः पूजितासिमयादेविवरदाभवमेसदा ४ पुत्रदारविवृद्ध्यर्थंलक्ष्म्याश्चैवविवृद्धये अलक्ष्मी
श्चविनाशायसर्वकालंहिजोत्तम ५ गुरुंसपूजयेद्भक्त्यावस्त्रैराभरणादिभिः द्वादशेवत्सरेषूणिपूजनीयाप्रयत्नतः ६
यावज्जन्मनथापूर्वविधिनानेनमानवैः ददातिवित्तपुत्रांश्चअर्चनीयासदास्त्रिया ७ अनेनविधिनायुक्तोयोहिपूजय
तेनरः नारीवापूजयत्येतांसस्यलक्ष्मीविवृद्धये ८ वंध्यातुलभतेपुत्रान्दुर्भगासुभगाभवेत् मृतवत्साजीववत्-
साकाकवंध्याचजीवति ९ दुःखितोहिनरःकश्चित्सर्वदासुखभाग्भवेत् एवंविधिविधानेनज्येष्ठायास्तुव्रतंचरेत्
१० एवंकार्यंकुरुश्रेष्ठज्येष्ठायाःशोभनव्रतम् नीराजनेकृतेचैवदीपोग्राह्यःसुभक्तितः ११ नैवेद्यसहितंग्राह्यव्र
तीत्वग्रेयुधिष्ठिरः गुरुहस्तात्सदाग्राह्योदीपःप्रज्वलितोमहान् १२ व्रतस्थोभक्तियुक्तश्चशुचिःप्रयतमानसः अ
नेनविधिनाचैवव्रतंग्राह्ययुधिष्ठिर १३ ज्येष्ठानामहादेवीभुक्तिमुक्तिफलप्रदा यस्तुपूजयतेराजन्तस्मैस्वर्गंप्र-
यच्छति १४ मासिभाद्रपदेपक्षेशुक्लेज्येष्ठार्कसंयुते तस्मिन्यस्मिन्दिनेकुर्यात्ज्येष्ठायाःपरिपूजनम् १५ तत्रा
ष्टम्यांयदावारोभानोर्ज्येष्ठर्क्षसंयुते नीलज्येष्ठेतिसाप्रोक्तादुर्लभाबहुकालिका १६ कृतस्नानोत्तरःकुर्यात्तस्या
मन्यत्रवादिने नद्यांपूर्वेद्युरात्मत्यासिकताशुद्धदेशजा १७ देवीरूपंततश्चैवकृत्वातुब्राह्मणैःसह मंडलेनातुसंस्था

प्यदेवींहेममयींततः १८ स्थापयेद्राजतींताम्रींरौप्यांवापटकुड्ययोः आवाहयेत्ततोदेवींश्रथवापुत्तके पिवा १९
त्रिलोचनाशुक्लदतींबिभ्रतींराजतींतनुम् विनतांललनयनांज्येष्ठामावाहयाम्यहम् २० स्तुतोक्तास्तोत्रसंपत्या-
गीतांचपुरतस्ततः सौवीरैश्चैवसंयुक्तोदद्यात्सामुनसेप्सितम् २१ स्तवासिनीभ्यःशक्त्यातद्दद्याद्वैस्तकृतव्रती
तत्रदेवीमनुज्ञाप्यततोभुंजीतवाग्यतः २२ भक्षयित्वातथाचम्यदेवीनत्वापुनःपुनः शचीव्रतंचकृत्वातु कुर्यात्प्रा-
तर्विसर्जनम् २३ एवमेवचकुर्यात्तद्व्रततुप्रतिवासरम् विसर्जनांतंचततःसिकतांवारिणिक्षिपेत् २४ अपूपवटका
नुदद्यात्ब्राह्मणेभ्यस्ततोद्विजः कुर्यादेवंप्रयत्नेनसायंचार्थविसर्जनम् २५ विद्यार्थीवाप्नुयाद्विद्यांस्त्रीकामःस्त्रि-
यमेवच हविष्यंस्वयमश्नीयात्ब्राह्मणान्नेनभोजयेत् २६ अनेनविधिनायस्तुब्राह्मणानांचतुष्टये व्रतांतेप्रतिमां
कुर्यात्सौवर्णीपलसंमिताम् २७ कृष्णावस्त्रेणसंयुक्तांन्याचार्यायनिवेदयेत् वस्त्राभरणमाल्यानुलेपनैःपूजितंद्वि-
जम् २८ प्रणिपत्यततःपश्चात्तस्मैसर्वंनिवेदयेत् ब्राह्मणाभुक्तवंतस्तेप्रकुर्युःस्वस्तिवाचनम् २९ एवंकृतेव्रतस्यास्य
कृसर्वशांतिःप्रजायते धनधान्यसमृद्धिश्चश्रारोग्यंचप्रजायते ३० परमांश्रियमाप्नोतिज्येष्ठादेव्याः प्रसादतः ३१
इतिश्रीभविष्योत्तरपुराणेनारदाबरीषसंवादेभाद्रपदमासमाहात्म्येनयोदशोऽध्यायः १३ ७
अंबरीषउवाच दूर्वाष्टमीतिविख्यातस्त्रीणांसौभाग्यवर्द्धनम् सर्वकामप्रदंनृणांतद्व्रतंकथयस्वमे १ नार
दउवाच शुक्लाष्टमीनिथिर्यातुमासिभाद्रपदेभवेत् दूर्वाष्टमीतिसाज्ञेयानोत्तरासाविधीयते २ मुहूर्तेरोहिणेष्ट-
म्यांपूर्वावार्यदिवापरा दूर्वाष्टमीतिसाकार्याज्येष्ठामूलंचवर्जयेत् ३ प्राप्तेभाद्रपदेमासिशुक्लाष्टम्यांद्विजोत्तम दूर्वा
मभ्यर्चयेद्भक्त्याज्येष्ठामूलंचवर्जयेत् ४ ऐंद्रर्क्षेपूजितादूर्वाहंत्यपत्यानिनान्यथा भर्तुरायुर्हरामूलंतस्मात्तांपरिवर्जये
त् सिंहार्कगेचकर्तव्यानकन्यार्केकदाचन ५ सिंहस्थेसोत्तमासूर्येनकार्योऽर्दितेमुनौ अगस्त्येऽर्दितेनानपूजयेदमृतो

द्भवम् ६ वैधव्यंपुत्रशोकंचदशजन्मनिपंचच राजन्भाद्रपदेमासिशुक्लाष्टम्यामुपोषितः ७ पूजयेच्छंकरंभ-
क्त्यायोनरःश्रद्धयान्वितः सयातिपरमंस्थानंयत्रदेवस्त्रिलोचनः ८ गणेशंशंकरंयस्तुदूर्वयापूजयेन्मुने फलैश्चस
फलैर्दिव्यैर्गंधपुष्पविलेपनैः ९ यानपूजयतेदूर्वांमोहादिह यथाविधि त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः
१० तस्मात्सपूजनीयासाप्रतिवर्षंवधूजनैः दूर्वागणेशमीशानंमुच्यतेपूजनाद्यात् ११ शुक्लोदशपूजितायां
दूर्वायाराजसत्तम स्थाप्यलिंगंततोगंधैः पुष्पैर्धूपैः समर्चयेत् १२ खर्जूरैर्नारिकेलैश्चमातुलिंगैः फलैस्तथा पूज
येच्छंकरंभक्त्यादूर्वायाविधिवद्द्विजाः १३ दध्यक्षतैः पुष्पफलैः रर्घ्यंदद्यात्त्रिलोचनम् दूर्वाशमीभ्यांसपूज्यमान-
वःश्रद्धयार्चितः १४ सर्वेसत्कृतजन्मास्यात्सर्वदेवैस्तुपूजितः विद्याप्राप्नोतिविद्यार्थीपुत्रार्थीपुत्रमाप्नुयात्
१५ धर्मार्थीधर्ममाप्नोतिकन्यार्थीलभतेचताम् मनसायद्यदिच्छेच्चतत्तदाप्नोतिमानवः १६ एवंसपूजयेद्दूर्वा-
भूतेषामानवैःफलैः ससप्तजन्मपापौघैर्मुच्यतेनात्रसंशयः १७ कृतोपवासः सप्तम्यामष्टम्यापूजयेच्छिवम् दूर्वा
समेतविप्रेद्रदध्यक्षतफलैःशुभैः १८ त्वंदूर्वे मृतजन्मासिवंदितासिसुरासुरैः सौभाग्यसंततिंदेहिसर्वकार्यकरीभ
व १९ यथाशाखाप्रशाखाभिःविस्तृतासिमहीतले तथाविस्तृतसंतानंदेहित्वमजरामरे २० सलिंगमंत्रैरीशान
मर्चयेत्प्रयतःशुचिः ततःसंपूजयेद्विप्रान्फलैर्नानाविधैरपि २१ अनघिपक्वमश्नीयादन्नंदधिफलंतथा अक्षार
लवणंराजन्नाश्नीयान्मधुनान्वितम् २२ दद्यात्फलानिविप्रेभ्योफलाहारीस्वयंभवेत् प्रणम्यशिरसादूर्वांसकलंशि
वमश्नुते २३ एवंकृतेभक्त्यामहादेवस्यपूजनम् गणत्वंयात्यसौनूनमुच्यतेब्रह्महत्यया २४ एवंपुण्यापापहरा
अष्टमीदूर्वसंज्ञिता चतुर्णामपिवर्णानास्त्रीजनानांविशेषतः २५ नारदउवाच अत्रैवान्यद्भुतंवक्ष्येसर्वका-
मफलप्रदम् शुक्लाष्टम्यांतुसप्राप्तेमासिभाद्रपदेतथा २६ दूर्वाव्रतानाममुखेउत्तराशाभिगामिनी पूजयेद्भूमा

नीयगंधमाल्यानुलेपनैः २७ फलमूलैस्तथाचैवदीपधूपैर्विसर्जयेत् अग्निपक्वंतथासर्वंनैवेद्यंचकथंचन २८ भो-
क्तव्यंचतथाब्रह्मन्अग्निपक्वंविवर्जयेत् दूर्वाकुरस्थांसंपूज्यविधिनायौवनश्रियम् २९ यौवनस्थिरमाप्नोतियत्र
यत्राभिजायते अष्टम्याफलपुष्पैश्चखर्जूरैर्नारिकेरकैः ३० द्राक्षामोदकपिष्टैश्चबदरैर्लकुचैस्तथा नारिंगैर्जंबुकैरा
त्रैर्बीजपूरैश्चदाडिमैः ३१ दूध्यक्षतैस्त्वजाभिश्चधूपैर्नैवद्यदीपकैः दूर्वामंत्रेणराजेंद्रपूजयेत्सरणामुदा ३२ तथापि
ष्टानिविप्रेंद्रफलचर्विविधप्रभो तिलपिष्टकगोधूमधान्यपीडानिपांडव ३३ भोजयित्वास्कृत्तन्मात्रसंबंधिस्वजनास्त
था ततोभुंजीततच्छेषस्वयंश्रद्धासमन्वितः ३४ कर्तव्यश्चैकभक्तेनज्येष्ठामूलंयदाभवेत् दूर्वामभ्यर्च्य यद्भक्त्यान-
क्तंदिवसंनयेत् ३५ मासेभाद्रपदेचैवशुक्लाष्टम्यांह्यजोत्तमाः दूर्वाष्टमीव्रतंपुण्यंयःकरोतीहमानवः ३६ तस्य
क्षयमाप्नोतिसंतानव्याप्तपौरुषम् नंदतेवर्धतेनित्यंयथादूर्वातथाकुलम् ३७ इतिश्रीभविष्योत्तरपुराणेनार
दांबरीषसंवादेभाद्रपदमासमाहात्म्येदूर्वाव्रतंनामचतुर्दशोऽध्यायः १४ ॐ नारदउवाच अस्मिन्
भाद्रपदेमासिशुक्लेज्येष्ठर्क्षसंयुता ज्येष्ठाष्टमीतिसाप्रोक्तादुःखदौर्भाग्यनाशिनी १ सर्वसंपत्प्रदात्रीदापुत्रपौ
त्रविवर्द्धिनी तस्याव्रतंप्रकर्तव्यंमहालक्ष्म्याःप्रतुष्टये २ दिनेःषोडशभिःसार्द्धंसर्वपापप्रणाशनम् विष्णुनागो
पितपूर्वंलक्ष्म्यागमनशंकया ३ स्कंदस्यप्रीतिभावेनकथयामासशंकर सौभाग्यजननंस्त्रीणांदौर्भाग्यपरिकृंत-
नम् ४ परमैश्वर्यजननंतद्व्रतंब्रूहिशंकर ईश्वरउवाच साधुसाधुमहाबाहोनष्टोहतवानघ ५ ततोहस
प्रवक्ष्यामिव्रतानामुत्तमंव्रतम् येनचीर्णेननरोदुर्गतियांतिकर्हिचित् ६ सुभगादुर्भगावापिस्त्रियोनविधवागृ
हे अस्तिदेयाव्रतंपुण्यंमहादेव्याः षडानन ७ नारीणांचनराणांचसर्वदुःखापहंतथा स्कंदउवाच देवासु
रमभूद्युद्धंपूर्णमब्दशतंपुरा ८ वृतेसुराणामधिपेदेवानांचपुरंदरे तत्रदैवैर्महावीर्यैर्नारायणबलाश्रयात् ९

श्चस्करानिर्जिताः सर्वेपातालतलमाययुः केचिल्लंकांगताःकेचित्स्वविष्टावरुणालयम् १० गिरिदुर्गसमाश्रित्य के
चित्तस्थुर्महाबलाः तत्रकोलास्करोनाममहावीर्योमहाबलः ११ गोमंतदुर्गमंदुर्गागिरिमाश्रित्यनिर्भयः याराजक
न्यकालोकेरूपयुक्तामहागुणाः १२ आनीयगिरिदुर्गस्योरमयामाससर्वशः रमयित्वाक्षयंतत्रकामरूपीविहंगमः
१३ तस्मिन्नेवतुकालेतुआगतोमुनिसत्तमो श्रुतिप्रभावसंपन्नः पुलस्त्योगोतमःसह १४ तीर्थयात्राप्रसंगेनश्रुत्वा
वाक्यंजनस्यतम् कोलास्करेनिजनिताकन्याहेतोःशिखिध्वज १५ तावूचतुःस्तुतःसर्वमागस्त्योस्तिमहामुनिः येन
तोयनिधिःपीतोविंध्याद्रिश्चनिवारितः १६ वातापील्वलनामानौदैत्यौयेनविनाशितौ नगच्छावोवयंसर्वेकोलास्करक
ष्टये १७ इत्यामंत्र्यजनाःसर्वेगत्वातमभिवाद्यच ऊचुःसर्वेयथावृत्तकोलास्करविचेष्टितम् १८ तच्छ्रुत्वाभगवानाहमे
नावरुणिरग्रधीः सृष्टिस्थितिविनाशानांकारणंभक्तवत्सलः १९ रामस्यादोतपस्यंतिब्रह्मविष्णुमहेश्वराः तिस्रः सं-
ध्यामूर्तिमनस्तेषांस्तुश्रुषणेरताः २० प्रविश्यतांमहालक्ष्मीशक्तिरूपेणसंस्थिता सर्वशक्तियुतादेवीलोकानांहितका
म्यया २१ इत्युक्त्वात्वरितंगत्वाकोलास्करवधात्यये निवेद्यनिखिलंतेभ्यस्तस्युःप्रांजलयोजनाः २२ तच्छ्रुत्वानिखि
लंतेभ्योब्रह्मविष्णुमहेश्वराः संध्यात्रयंसमाहूयवाचंप्रोचुर्जनेश्वराः २३ वेदारुस्करवेदद्रुमौलिमाणिक्यमंडल ह
निष्यतिमहालक्ष्मीर्युद्धेकोलास्करंरिपुम् २४ भगवत्योमूर्तिमत्योदंडशूलादिभिर्वरैः आयुधैर्विविधैःकृत्वाजय
मास्यत्यसंयुगे २५ युष्माकंचसहायोसौयस्मान्क्रोधसमुद्भवः भूतनाथोभूतमन्युर्वःसहायोभविष्यति २६ इत्यु
क्त्वात्वरितंगत्वारुरुधुःकोलराक्षसम् निरुध्यचपुरींदध्मौश्रृंगजुर्जुगुरस्वनाः २७ भिंधत्यम्बदिशांहृद्वेवर्धयंत्यम्बमन्
क्रुधा २८ इतिश्रीभविष्योत्तरपुराणेनारदाबरीषसंवादेभाद्रपदमासमाहात्म्येपंचदशोऽध्यायः १५ ७ १४
स्कंदउवाच देव्याःसेनापरिक्रांतंपुरंतस्यस्करद्विषः श्रुत्वोत्कीर्तितःसोऽपिएतन्मेकृपयावद १ ईश्वरउवाच

कोलासुरोपितच्छुत्वानिर्ययौचनिजासनात् रोषेणक्रोधताम्राक्षोमेरोरिवमृगांतकः हस्त्यश्वरथपादातचतुरंगबलान्वि
तः २ निर्ययौपृतनायोद्धुकालिकायाश्वाशनिः सकुंडलशिरस्त्राणकवचंधृतवानधी ३ चन्द्रगोधांगुलित्राणःक्रुद्ध
रुद्रइवापरः ततोरासससैन्यंतभूतनाथेनसंगतः ४ देवनारिमनोल्लासियुद्धचक्रेनिर्भीषणम् महारवैर्भीमघोषैः
र्बाणक्केंकारनिःस्वनैः ५ निस्वाननिनदश्चैवलोकसंक्षमयोभवत् जयाभिधानंवदतांधावतामितरेतरम् ६ वृषेस
मरेघोरंमुष्टामुष्टिकचाकचि उद्धतेराक्षसेवेलेभूतनाथोमहाबलः ७ ममर्दराक्षसानीकंशरैरतिदारुणैः हतदृष्ट्वा
सरबलक्रुद्धः कोलासुरोरणे ८ अभिदुत्यगदापाणिंताडयामासभैरवम् ययौमूर्च्छांमहाश्चर्यतेनाभिहतमस्तकः ९
ततोदिव्यनिवेगेननाभिर्दुद्रावचाद्भुते त्रिशूलैरपिजघ्नुस्तंपट्टिशैश्चविदारयन् १० मुष्टिभिस्ताडयामासुर्नखरैश्चव्यदा
रयन् यदायातसमाजघ्नुःसिंहशूरवरयथा ११ सकुंडलशिरस्त्राणोदष्टोष्टारक्तलोचनः कृतभृकुटिवक्त्रोसौराक्ष
सस्तांमुहुर्मुहुः १२ गदयाताडयामासशिरःकंठोरुकुक्षिषु बभंजुस्तागदामानुहसन्तसमदाकुलः १३ ततोधनुर्धरोभू
त्वाबालजारमवाकिरत् तासांशरीरमर्माणिभिंदन्सरपुरोगणौ १४ ननामबद्धवैरोसौहृदयेसाभिनच्छरैः तत्रयुद्ध्य
न्तरास्तास्तुतंपादेजगर्जुर्गुह्याम् १५ आकाशेभामयित्वातुनिक्षिप्यगगनेक्रुधा कोलासुरोपिपतितो यावदुत्थातुमि
च्छति १६ तावन्निर्गत्यलक्ष्मीस्तांपादाभ्यांप्रत्यपीडयत् तत्याजपीडितरक्षोविकृत्यनयनेभृशम् १७ मुक्तकेशस्त्व
नंकृत्वाततोमोहमुपेयिवान् ततोदेवाःसगंधर्वामनुष्याऋषयस्तुवन् १८ देवनाथश्चदेव्यश्चननृतुःसमदाकुलाः दे
वदुंदुभयोनेदुःपुष्पवृष्टिःपपातह १९ दिशःप्रसेदुर्मरुतोववुःसर्वसुखावहाः सुरासुरशिरोरत्नवंद्यपादांबुजास्ततः
२० देव्योदिव्येनयानेनयांतिकोलापुरंप्रति आयांतींपद्मजांवीक्ष्यमुक्तपादायशूरबलः २१ नुष्टावपरयाभक्त्याराजकन्या
गणोमुदा राजकन्याऊचुः वंदारुवीरसुरवृंदकिरीटकोटीरोचिघटानिकरकल्पितरत्नदीपम् देवित्वदीयचरणं शर

णंजनानांसेवामहेसकलमंगलवर्द्धनाय २२ उत्फुल्लकेरवदलायतलोचनायेगंडोल्लसच्चलितकुंडलमंडितायै राकाशशि
प्रतिधयन्ननुकोमलायैतस्यैनमःकमललोचनवल्लभायै २३ सद्रुक्मकल्पलतिकांहरिकंठभूषांकेयूरहेमकटकोज्वलकं
कणांकं ससारसागरमुखेपततोममाद्यदेहित्वदीयपदपीठमगमातः २४ दृष्ट्वादेविजनाजयायविबुधब्रह्मादिप
त्यगनाविष्णोर्वक्षसियाच्चकारवसतिंनीलाब्जमालादशा इद्राद्यानतसत्वदीयचरणद्वंद्वाब्जसेवारतंकारुण्यामृतसा
रपूरितदृशामापश्यपश्येत्यसौ २५ मल्लिप्रफुल्लकुसुमोज्वलमध्यभागधम्मिल्लभारजितनारकवीचिवप्रा उत्तुंगह
मनिकषाज्ज्वलकायकांतिलक्ष्मीस्त्वयप्रणमताश्रियमाननोतु २६ इतिस्तुत्वामहालक्ष्मीभक्तानाभीष्टदायिनी योगि
न्योयभविष्यध्वमितिनासांवरददौ २७ इतिश्रीभविष्योत्तरपुराणेनारदाबरीषसंवादेभाद्रपदमासमाहात्म्येषो
डशोऽध्यायः १६ ७ ईश्वरउवाच ततःप्रभृतिलोकेषुपूज्यालाःसर्वकामदाः नाम्नातुःषष्टियोगिन्यो
महालक्ष्मीपरिग्रहात् १ नृत्यंतिनिचहेस्तत्रगीतवादित्रनिःस्वनैः पुरोदिव्यामहालक्ष्मीकरहारपुरेनिशि २ एव
प्रभावासादेवीविष्णुरामाषडानन व्रतस्यास्यविधानंचशृणुमत्तोविधानतः ३ मासिभाद्रपदेशुक्लेपक्षेज्येष्ठायुता-
ष्टमी प्रारब्धव्यव्रततत्रमहालक्ष्म्यायतात्मभिः ४ करिष्यामिव्रतंदेवित्वद्भक्तस्तत्परायणः तन्मेविघ्नमेयातुस
मासित्वत्प्रसादतः ५ इत्युच्चार्यततोबध्वादोरकंदक्षिणेकरे षोडशग्रंथिसहितंगुणैःषोडशभिर्युतम् ६ ततोऽन्वहम
हालक्ष्मीपूजयेन्नियतात्मवान् गंधपुष्पैःसनैवेद्यैःयावत्कृष्णाष्टमीदिनम् ७ तस्मिन्दिनेतुसंप्राप्तेकुर्याद्विधापन
व्रती वस्त्रमंडपिकांकृत्वामाल्यरत्नोपशोभिताम् ८ त्रिभूमिकांचसंस्तीर्णांनानादीपैश्चशोभितां चतस्रःप्रतिमाः
कृत्वासौवर्णीस्तत्स्वरूपिणीः ९ स्नपनंकारयेत्तासांपंचामृतविधानतः षोडशैरुपचारैश्चधूपदीपादिभिस्तथा १० १५
जाग्रणंतत्रकर्तव्यंगीतवादित्रनिःस्वनैः ततोनिशीथेसंप्राप्तेऽभ्युदितेऽमृतदीधितौ ११ कृत्वातुस्थंडिलेपद्मंसषडंगं

प्रपूजयेत् दद्यादर्घ्यंचरागेणघृतीतस्मैसमाहितः १२ क्षीरोदार्णवसंभूतचंद्रलक्ष्मीसहोदर पीयूषधामरोहिण्यासहितोर्घ्यंगृहाणवे १३ क्षीरोदार्णवसंभूतेकमलेकमलालये प्रयच्छसर्वकामान्मेविष्णुवक्षस्थलाश्रये १४ पुत्रान्देहिधनंदेहिसौख्यसौभाग्यमेवच कालिकालिमहाकालिविकरालिनमोस्तुते १५ त्रैलोक्यजननित्राहिवरदेभक्तवत्सले एकनाथेजगन्नाथेजमदग्निप्रियेव्यये १६ रेणुकत्राहिमांदेविराममातःशिवंकुरु कुरुप्रियमहालक्ष्मित्वंश्रियंत्वाशृंगनाराय १७ मंत्रैरेतैर्महालक्ष्मीस्तुत्वाश्रोत्रिययोषिताम् श्रीसूक्तेनतथावह्नौपद्मानिजुहुयाच्छुचिः १८ पायसंचैवबिल्वानि नृदलाभेतथाघृतम् गृह्णेभ्यश्चैवहोतव्यंसमिच्चरुतिलादिकम् १९ चंदनंतालपत्रंचपुष्पमाल्यादिकंतथा नवेवस्त्रेथसौभाग्यंक्षिप्त्वाबहुविधानितु २० प्रत्येकंषोडशोक्तानिपूगपर्णानिचैवहि तान्यन्येनसमाच्छाद्यव्रतीदद्यात्समंत्रकम् २१ क्षीरोदार्णवसंभूतालक्ष्मीश्चंद्रसहोदरा व्रतेनानेनसंतुष्टाप्रीयतांविष्णुवल्लभा २२ इंदिराप्रतिगृण्हातिइंदिरावैददातिच इंदिरातारकोभाभ्यांइंदिरायैनमोनमः २३ दत्वार्घ्योपापादानिश्चश्रोत्रियायाश्चयोषिताम् चतस्रःप्रतिमास्तास्तुब्राह्मणायनिवेदयेत् २४ एवंकृत्यंतुनिर्वर्त्यव्रतीभोजनमाचरेत् २५ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादे भाद्रपदमासमाहात्म्येसप्तदशोऽध्यायः १७ ७ स्कंदउवाच केनेदंस्त्रीकृतंपूर्वंकथंकस्मिन्प्रकाशितम् ब्रूहिमेतत्वतोदेवयद्यहंतववल्लभः १ शंकरउवाच आसीद्राजासार्वभौमोमगधाणइतिश्रुतः कुंडिन्येनगरेरम्येतस्यपत्न्याचतीप्रिया २ तमागतंततःकश्चित्सेवकोब्राह्मणोत्तमः अज्ञानमननस्यासौनाम्नाकेतूपरुत्तदा ३ तवल्लुकइतिख्यातोबभूवद्विजसत्तम कदाचिन्मृगयासक्तोभूपालोवनमाविशत् ४ तत्रबध्वावराहादीन्मृगान्हत्वासहस्रशः क्षुत्तृट्परिगतःशांतोवृक्षमूलमुपाश्रितः ५ उदकान्वेषणेराजन्प्रेषयामासतंवशः वनेजलंतुनापश्यत्क्वचित्भ्रांताःप्रयत्नतः ६ तेगत्वानृपतिंप्रोचुःनात्राभइतिदुःखिताः तवल्लुकोपिबभ्रामविपिनंतदतंद्रितः ७ भ्रममाणस्तदापश्य

तूकस्मिंश्चिद्वनगह्वरे रम्यंसरोवरंदिव्यंकुमुदोत्पलमंडितम् ८ तत्रापश्यद्वेवकन्यांकन्यांदिव्यांमनोरमाम् चार्वंगींचारुनयनांपीनोन्नतपयोधराम् ९ हारकंकणकेयूरनूपुरालंकृतांप्रभाम् पूजयंतींमहालक्ष्मीव्रतरूपेणसादरात् १० नवलकोपिपप्रच्छकिमिदंकथ्यतामिति स्त्रीऽवाच महालक्ष्मीव्रतमिदंसर्वकामफलप्रदम् ११ कियतेस्माभिरेकाग्रमनोभिस्तच्चभक्तितः नवलकोपितच्छ्रुत्वाव्रतंजग्राहभक्तिमान् १२ तदनुज्ञांगृहीत्वास्त्रंजलमादायसत्वरः आजगामजलंतस्मैदत्वाचांजलिनासह १३ जलंपीत्वानृपस्तस्यपृष्टवान्दारकंकरे किमिददोरकंविद्वन्किंव्रतंकृतवानसि १४ राज्ञापृष्टस्तवल्कोपिकथयामासतद्व्रतम् तच्छ्रुत्वाराजशार्दूलोव्रतंजग्राहभक्तिमान् १५ तवल्कनसहितोराजास्वपुरमायायौ पद्मावतीगृहंगत्वातयारतुमनाःसह १६ रममाणातुसादेवीतेनराज्ञाप्रियेणवै तंदृष्ट्वादोरकंहस्तेकुपितात्यंतकोपना १७ कयात्ववंचितोब्रूहिकयाबद्धःसदोरकः मावादीरन्यथात्येतल्लक्ष्मीव्रतमनुत्तमम् १८ इत्युक्काचप्रियापाणौतंचिच्छेददोरकम् ज्वालामालाकुलेवह्नौक्षिप्तवत्यतिकोपना १९ हाहाकष्टमिदंपापंकृतंमूढत्वयातथा इतिनिर्भर्त्सयतीराजातत्याजवनगह्वरे २० साचहानिययौपश्चात्तत्रहानिययौनृपः महालक्ष्म्यापचारेणसारण्येजलवर्जिते २१ मृगमाणांवनेतस्मिन्नकश्चिद्धृतिमाप्नुयात् विचरंतीवनेतत्रऋषेरेकस्यचाश्रमम् २२ ददर्शवनसंकीर्णंशांतंकृष्णामृगान्वितम् तत्रापश्यद्वनेरम्येवसिष्ठंमुनिपुंगवम् २३ ववंदेचरणौतस्यविसंज्ञादुःखकर्षिता चिरंध्यात्वामुनिस्तस्याज्ञातवान्दुःखकारणम् २४ महालक्ष्म्योपचारेणज्ञातंविज्ञानचक्षुषा नाहतकारयामासतस्यादुःखोपशांतये २५ तद्दुःखंतत्क्षणाद्वनष्टमेवाभवत्तदा पुनश्चमृगयासक्तोभूपालोवनमाविशत् २६ कांचित्मृगंसमाविध्यबाणेरेकेनबाहुना अथागच्छन्मृगपदंतस्याभूच्च दयागमः २७ वरमुनिंददर्शाग्रेवसिष्ठंवीतकल्मषम् कृतांजलिंव्यक्रियादृष्ट्वाचरंतीबहिरंतिकान् २८ हावभावावहासाग्रैहरंतीहरिणेक्षणा मदाभिगत्यनृपतिःप्रोवाचमधुरंवचः

२९ वामोरुकासिकल्याणीकिमर्थेजलसेवने किन्नरीमानुषी वात्वंयक्षिणीचारुहासिनी ३० किमत्रबहूनोक्तेनभ
जमानं भजस्वमाम् नृपेणतेनभक्तोक्तंसम्यक्तांवाक्यमब्रवीत् ३१ पुनर्भजामितांहत्वाब्रवैहिमहिषींनव महालक्ष्म्या
पचारेणत्वयाहीनावसाम्यहम् ३२ मुनींद्रस्याश्रमेरम्येतरुगुल्मोपशोभिते ममोपरिकृपाविष्टोमहालक्ष्मीव्रतोत्तमम्
३३ कारयामासविधिवत्सर्वविघ्नोपशांतये तयोक्तंवचनंश्रुत्वासचोत्फुल्लविलोचनः ३४ ऋषेरनुज्ञामादायप्रियामा
दायसत्वरः दृष्टपुष्टजनैर्युक्तंपताकाध्वजसयुतम् ३५ प्रविवेशतयासार्द्धंसस्त्रीभिर्वंदितः महालक्ष्मीव्रतभूपतया
सहचकारह ३६ भुक्तेहभोगान्निखिलान्पुत्रपौत्रैःसमावृतः भूपालःसार्वभौमोभूत्तवल्कोपात्यतायुयो ३७ महा
लक्ष्मीप्रसादनसन्निधिःसर्वसंपदाम् एवंप्रभावासादेवीनराणांनिष्टदायिनी ३८ सर्वपापहरादेवीसर्वदुःखापहारिः
णी एवंषोडशवर्षंतुकर्तव्यंव्रतमुत्तमम् ३९ याकरिष्यतिभक्त्यास्वयंसिद्धिरुपासते लोकपालाश्चपुष्यंतिदेशाइ
वमनोरथान् ४० नारीवापुरुषोकरिष्यतिमुदाभक्त्याव्रतंचोत्तमं किंवान्यद्धरिरुद्रपद्मजकराः पुष्यंतितस्यप्रियम् तसा
दौपरिरंजयंतिमनुजामौलिप्रभामंडलैस्तस्मिन्नेचकुटुंबिनीवसतिसालक्ष्मीःस्वयंविष्णुना ४१ मद्वक्त्यावाप्रकुर्वीतव्र
तमेतदनुत्तमम् श्रुतकालेस्वयंविष्णुःसंसारात्संरिरक्षति ४२ यइदंशृणुयान्नित्यश्रावयेद्वासमाहितः नसत्यजति
तंलक्ष्मीरलक्ष्मीर्नैवकारयेत् ४३ सर्वपापविनिर्मुक्तःस्वर्गलोकेमहीयते कलाभिःषोडशैर्युक्तोयथापूर्णोनिशाकरः
४४ तथाषोडशभिःसाध्यमहोभिःपरमव्रतम् ४५ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमास-
माहात्म्येत्रयोदशोऽध्यायः १८ ६ नारदउवाच शुक्लस्यनवमीराजन्सर्वपापप्रणाशिनी तस्यानु-
ष्ठानमात्रेणसर्वदुःखात्प्रमुच्यते १ अतःसर्वत्रविख्यात मदुःखनवमीव्रतम् माहात्म्यंचरितंतस्यव्यासायामितेजसे २ पप्रच्छुःप्रणताःसर्वेनैमिषारण्यवासिनः ऋषयऊचुः येनचीर्णेनधर्मज्ञशोकदुःखंनजायते ३ कृपाकु

रुमहाबुद्धेब्रूहिदुःखहरंव्रतम् व्यासउवाच शृण्वंतुऋषयःसर्वेशौनकाद्यामहर्षयः ४ येनराःपुण्यकर्माणोदंभा
हंकारवर्जिताः श्रद्धयानिश्चयोनित्यंनहिंसानिरताश्चये ५ यथाग्निलितभोक्तारोस्करिणःस्युः मचैवहि गुह्यंचकरु-
मिच्छामिदुःखनाशकरंपरम् ६ येदुःखनवमीप्राप्यनराश्चैव नपंडिताः शिवागच्छनिशरणंउत्पत्तिस्थितिकारिणीम्
७ जन्मांतरशतेवापिनतुदुःखस्यभागिनः श्रदुःखनवमीनामत्वयाकेयंनिरूपिता ८ भविष्यतिकदावेयंकदाकार्य
भविष्यति पूजनीयाकथंगौरीविधानंकीदृशंतथा ९ नदेयनास्तिकायैतदभक्त्यायशठायच व्रह्मवैश्यद्रुधानभ्योवि
धिंसर्वमशेषतः १० समाहितमनावत्सिभवंतंपुण्यदायकम् सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी ११ निशा-
नंदमयीदेवीतमःपारप्रतिष्ठिता ब्रह्मांडजननीचेयमुत्पत्तिस्थितिकारिणी १२ प्रकृतिःपुरुषश्चैव यमात्माविभिदेत्तदा
यथाशिवस्तथागौरीयथागौरीतथाशिवः १३ यथागौरीतथालक्ष्मीदुःखपापापहारिणी तासांपूजाविधानेननकश्चिद्दुः
खभाग्भवेत् १४ नभस्यशुक्लनवमीयदापूर्णानिथिर्भवेत् व्रस्तदोषादिहरितासर्वदुःखहरापरा १५ प्रशस्तायानरः
स्नात्वाकृत्वानित्यविधितत्तः मौनेनगृहमागच्छेत्संयतस्तत्परायणः १६ व्रदुःखदायिनीभूत्वाशुचिस्थानेगतस्तथा
गोमयेनविलिप्तायांशुचौमंडपिकांशुभाम् १७ सकुंभस्थापयेत्तत्रगुडेनालिप्यभीतिकाम् व्राच्छादितासुधूपैस्ता
ड्यमानददायिनी १८ व्राचार्यानुत्तयातस्यांजगद्धात्रीप्रपूजयेत् वाणकंचददौचास्यासपक्वान्नंफलान्वितम् १९
शक्तश्चेदुपवासेननिशिजागरणंचरेत् व्रशक्तेनचकर्तव्यंपयःप्राश्यमथापिवा २० फलंवापिप्रयत्नेननहिंसामाचरेत्त
था प्रभातेविमलेजातेकृत्वानित्यविधिंपुनः २१ ब्राह्मणान्भोजयेच्छक्त्यासपत्नीकांशुचिस्तथा देवीविसर्जयेत्पश्चा
त्व्राचार्यपूजयेत्तथा २२ व्राचार्यंकृत्स्वशाखोक्तोनववर्षाणिकारयेत् सौवर्णैर्भूषितैर्वस्त्रैर्नत्वातंचसमर्चयेत् २३
पंचवाप्यथवाचैकनारिकेरैश्चवायनम् पक्वान्नंनवसंख्याकंब्राह्मणायनिवेदयेत् २४ पश्चाद्बंधुजनैःसार्द्धंभुंजीय-

नियतःशक्तिः श्रुत्वाकथांपुण्यतमांवाग्यतस्तत्परोभवेत् २५ सकदाचिन्महदुःखेनयुज्यतेनात्रसंशयः भुक्त्वाभोगा
यथाकामान्सयातिशिवमंदिरे २६ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादे भाद्रपदमासमाहात्म्येएको
नविंशोऽध्यायः १९ ७ नारदउवाच अत्रैवोदाहरंतीममितिहासपुरातनम् अरण्येविषमेपूर्वशा
पदग्धाप्सराःकिल १ आसीज्जातिस्मराकाचिन्निर्यग्योनिमुपाश्रिता कुक्कुटीनामतोप्यासीत्सदादुःखेनदुर्म
ना २ तत्सखीमर्कटीनामतेचोभेदुःखकर्षिते अथास्मिंश्चवनोद्देशेपरस्परहितेरते ३ ऋषयऊचुः सोका-
प्साराःसखीकास्याः केनशप्तानयासह एतदाचक्ष्वभगवन्सर्वज्ञोऽसिमहामुने ४ व्यासउवाच अप्सराइंद्र
सदसिभावज्ञानामाविश्रुता तत्सखीचरसज्ञाख्याऽभूत्सर्वगुणान्विते ५ रूपलावण्यसंपूर्णेनृत्यगीतविशारदे तयोः
सौंदर्यमालोक्यस्वर्वेश्यामेनकादयः ६ आत्मानंनिंदयंत्येवखेदसंतप्तमानसाः अवेक्ष्यचप्रयोनापिक्षणंस्थातुंनः
शक्यते ७ तयोःकटाक्षमात्रेणमुह्यंत्यपिमहर्षयः अथेंद्राणीपुत्रकामावाक्याद्देवपुरोधसः ८ आगत्यमेरोःशि
खरेदशम्यादिदिनत्रयम् व्रतंचक्रेमहाभक्त्याऽभ्यर्चंतीरमाच्युतौ ९ तीरस्करनरंगिण्याविश्व कर्मविनिर्मिते मंदि
रेप्रतिमांविष्णोर्लक्ष्म्यायुक्तांसलक्षणाम् १० उपचारैर्बहुविधैर्मंदारकुसुमैरपि पूजयामासपौलोमीस्वयंयदुचितैः शु
भैः ११ एकादश्यांनिशाकालेकुर्वंतिहरिजागरम् गंधर्वाप्सरसःसर्वानृत्यगीतायमाढ्यत १२ हाहाद्या श्चैवगंध
र्वाःस्वर्वेश्यामेनकादयः तत्रागताःपवित्रंतुनृत्यगीतंचकुर्वतः १३ तेषामध्येतुभावज्ञासख्यायुक्तारसज्ञया गीतनृ
त्यंनिरूपमंकरोतिस्मचकौतुकम् १४ एवंव्रतेप्रवृत्तेतुप्रतिक्षंतंकरेदिने शच्याहुतेऽभेतेतुनृत्यगीतंचचक्रतुः १५
कदाचिद्देवराजस्तुकामार्तःकेलिमंदिरे जगामतत्रनापश्यद्विरंसुर्निजचक्षुभाम् १६ दूतींपप्रच्छकुत्रास्तिशचींताभा
नयञ्चिरात् साप्रणम्याब्रवीत्स्वामिन्कांतातेमेरुमूर्द्धनि १७ व्रतंकरोतिनियमाद्दशम्यादिदिनत्रयम् आयास्य

तिनचाहूतानानेयापिचसाप्रभो १८ तयाप्याज्ञापयविभोकिंकरीकिंकरिष्यति शक्रोदुतीवचःश्रुत्वाबभाषेतांस्मर
कुला१९ भावज्ञांचरसज्ञांचहयमानयमेनिके शक्राज्ञयाततोदूत्यआनयामासतेउभे २० एतस्मिन्नेवसमयेशक्रदू
तीत्वरान्विता तयोःसमययोनेतुंतेउभेहरिजागरम् २१ दूतीवाक्यंसमाकर्ण्यदूतिकाप्सरसोःशुभाः तयासहेंद्र
भवनजगामद्रुतचारिणी २२ क्रीडावसरमालक्ष्यदूत्यौतत्रबहिःस्थिते कल्पंतेकथितताभ्यांशच्याआह्वानमेतयो
२३ तदाविज्ञाप्यदेवेंद्रंतेउभेरभसान्विते आजग्मतुर्मरुशिरःसर्वभोगसमन्विते २४ आसवास्वादजनितमदघू
र्णितलोचने वदनालिमचक्षोजेतांबूलपुरितानने २५ विमर्दनाभिःकुसुममालाभिःस्फुरनोत्सवं सूचयत्यावेग
लग्नोरनिदंतनखक्षतैः २६ तेविलोक्यनिशीथोर्ध्वमागतेसमयच्युते किंचिद्रोषाकुलादेवीग्रतस्थावाक्यमब्रवीत्
२७ ब्रूतामप्सरसौनित्यंकिंविलंबस्यकारणम् अप्सराऊचुः देवेंद्रस्याज्ञयादेविक्षणांतत्कोलिमंदिरम् २८
निषेवितमथोजातोविलंबःशक्रवल्लुभे तदाकर्ण्यचसापत्न्यमत्सराक्रांतमानसा २९ शचीशशापाप्सरसोऽप्यपराधान
प्रकाश्यवै अहोपश्यतुसर्वेपिदास्योदेवानिलंघनम् ३० येउभेअश्रुचीमात्रेसतांबूलमुखेमम रूपचातुर्यवर्गेणप्रा
ष्टदेवमंदिर ३१ सापराधेतुकर्तव्यःप्रभुणादंडएवहि नोचेन्नश्यतिधर्मोपिनष्टधर्मकुतःफलम् ३२ इयंतुकुब्ज
टीभूयाद्भावज्ञारूपगर्विता रसज्ञामर्कटीभूयान्नानादुःखसमन्विता ३३ शच्याशापेनतादूतेभूयोभूयोप्रणम्यच
प्रार्थितापरयाभक्त्याशापमुक्तेश्वकारणात् ३४ तुष्टाशचीग्राहतयाःपरशापविमोचनम् अदुःखनवमीनामयातिथि
स्तत्रपूर्वतीं ३५ आराध्यत्वन्यकालेनभूयास्त्राशोकवर्जिते एवमाकर्ण्याप्सरसौपतिनेपशुजन्मनि ३६ दूर्युक्ता-
वावलोकात्यपुण्यजातिस्मृतोऽत्वयोः तस्मिन्वेनेनागकन्याचरत्योव्रतमुत्तमम् ३७ ससखीमागतातत्रयूयंकिमुपासः
ते तैरुक्तंभवभीतानांव्रतंदुःखप्रणाशनम् ३८ आचख्यतदापुण्यतादुःकृपयातयोः तत्पुण्ययोगात्ससखीदिव्य-

रूपादिवंगता ३९ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादे भाद्रपदमासमाहात्म्येविंशोऽध्यायः २० ध्
नीरदउवाच दशम्यांचैवशुक्लायांमासेऽस्मिन्नघनाशने कार्यंदशावतारव्यंव्रतंत्रैलोक्यवंदितम् १ विधिंत
स्यप्रवक्ष्यामिशृणुराजन्हितायते स्नात्वाजलाशयेस्वच्छेपितृदेवादितर्पणम् २ कृत्वानृपकुलेश्रेष्ठगृहमागत्यमानव
वृः गृण्हीयाद्धान्यकणंस्यप्रशस्तंप्रस्थनित्रयम् ३ क्रमेणयाचयेज्जंतुःपुंसस्तघृतसंयुतम् वर्षेवर्षेदिनंतस्मिन्नवव
र्षाणिवैतदा ४ प्रथमेपूपकान्कुर्याद्द्वितीयेघृतपूपकान् तृतीयेपूपवासारान्चतुर्थेमोदकान्शुभान् ५ साहालि
कान्पंचमेवर्षेषष्ठेवैरवडवेष्टकान् सप्तमेक्षीरसानकेपुष्पंतथाष्टम ६ नवमेकर्णवेष्टांश्चदशमेमडकान्शुभान् द्
शात्मनोदशाहरेद्दशविप्रायदापयेत् ७ क्रमेणमंत्रणंदत्वायथोक्तविधिनानृप अर्द्धार्धंविष्णवेदेयमर्द्धंद्विजातये
८ ततोऽपरार्द्धमश्नीयादुत्वारम्यजलाशयं दशावतारानभ्यर्च्यपुष्पधूपविलेपनैः ९ मंत्रेणानेनमेदद्याद्धरिमभ्युक्ष्य
वारिणा मत्स्यकूर्मवराहंचनारसिंहंत्रिविक्रमम् १० रामरामंचकृष्णंचबौद्धंचैवसकल्किनम् गतोस्मिशरणंदेवह
रिंनारायणंविभुं ११ प्रणतोस्मिजगन्नाथंसमेविष्णुप्रसीदतु छिनत्तुवैष्णवींमायांभक्त्याप्रीतोजनार्दनः १२ श्वेतः
द्वीपनयत्वस्मात्मयात्मासंनिवेदितः एवंयःकुरुतेभक्त्याविधिनानेनसव्रत १३ दशावतारनामाख्यांतस्यपुण्यफलंशृ
णु श्रूयतेयास्त्रिमालोक्यपुरुषाणांदशादशाः १४ नावन्नदृनिलोकेस्मिन्यावच्चक्रमणंभुवि संसारसागरस्योरात्र
ह्त्यजगत्पतिः १५ श्वेतद्वीपनयत्यास्मुव्रतेनानेननोषितः कितस्यनभवेल्लोकेयस्यतुष्टोजनार्दनः १६ यद्दुर्लभंयद्दुः
प्राप्यमनसापिनगोचरम् तत्सर्वंप्राप्यतेध्यानोददातिमधुसूदनः १७ सिंहोजनार्दनः साक्षात्कालरूपधरोच्युतः सर्व्ये
लोकेषुयत्मानोभूभारोत्तारकारणात् १८ यास्त्रीव्रतमिदंपार्थचरिष्यतिमयोदितम् सालक्ष्म्याचलयायुक्तापुत्रभृत्स
मन्विता १९ मृत्युलोकेचिरंस्थित्वाविष्णुलोकेविधीयते २० येपूजयंतिपुरुषाः पुरुषोत्तमस्यमत्स्यादिकास्तुदशमीसुदशा

वतारान् मन्येदशास्त्वपिटशास्कमुरवंविमृश्यतेयांतियानमधिरुत्यमुरारिलोकम् २१ एतद्वशावतारव्यंव्रतंपापप्रणा
शनम् यस्यानुष्ठानमात्रेणसर्वपापात्प्रमुच्यते २२ पुरालीलाधरोनामवस्कपालोनृपोत्तमः पानकैर्बहवोजातायोन
यःपापसंभवाः २३ व्रतस्यास्यप्रभावेनस्वर्गतोदिव्यदेहधृक् २४ इतिश्रीभविष्योत्तरपुराणेभाद्रपदमासमा-
हात्म्येएकविंशोऽध्यायः २१ ७ ऋषयऊचुः कस्मात्प्रोष्ठपदेमासिकर्तव्यंपितृतर्पणम् श्राद्धप्र-
तिदिनंतत्रकथंचपरपक्षके १ सूतउवाच पुराकुंभोद्भवोनामऋषिःपरमकोपनः विंध्यंनमयितुंदेवैःक-
स्यानिष्कासितोयदा २ अगस्तिंकुशभंगश्चमधुःरवङ्गयवास्तिलः कथंतषामतिप्रीतिःकारणंतत्रमशृणु ३ नदाशो
कसमाविष्टःक्रोधमोहसमन्वितः तिलायवस्तथारवङ्गोमधुभंगः कुशस्तथा ४ तैःसमागम्यतीर्थानिचकारवसुधा
तले कदाचित्समयेसोऽथसिंधुतीरमुपागमत् ५ क्षीराब्धिशायिनंद्रष्टुमागमध्येरयाचन आयासमानोबहुशो
नोत्तरंजलधिर्ददौ ६ जगर्ज्जुर्निजवीचीभिर्यथामत्तामहागजाः तदावमानकोपेननिजबाहुबलेनच ७ तपःप्रभावा
त्स्वस्यापिपाणिनाब्धिंपपोमुनिः पीतेब्धौमुनिनातेनजीवाःसागरवासिनः ८ त्यक्तप्राणास्तथाकेचित्केचित्मूर्छा
प्रपेदिरे एवंकोलाहलोजातोदेवाः शर्वपुरोगमाः ९ ऋषिमात्वपितुंयाताःसर्वभूतहितायवै ततःकुंभोद्भवनासौ
समुक्तोवैमहाव्रतः १० तत्राप्यशक्तिनांप्राप्तादातंदत्तवान्वरम् पर्वसुसलिलेयस्यनकुर्वंतीहमज्जनम् ११ तेप्य
ष्टादशभिः कृष्णैर्व्याप्नुवंतिनसंशयः तस्मात्सर्वप्रयत्नेनपर्वणि स्नानमाचरेत् १२ तीर्थानिपुष्करादीनिस्वर्धुन्याद्याः
सरिद्वराः पर्वस्कंधियास्यंतिनिजपापस्यमुक्तये १३ भवंतियस्मिन्नान्नितथासर्वप्रियोरसः लवणोनामविख्या
तोयतःसर्वरसाःप्रियाः १४ लवणाब्धिरितिख्यातोरत्नाकरइतिस्फुटम् एवंदत्वावरंतस्मैब्रह्माद्याःस्वालयंगताः १५
तत्रैवनिलयंकृत्वासशिष्योवासमन्मुनिः अथैकस्मिन्दिनजातेनारदः कलहप्रियः १६ वैकुंठमगमद्विष्णुंप्रणम्य

चजगादच अहोकष्टंमहाश्चर्यंकृतमागस्तिनाविभो १७ पिताजितोजलनिधिः कृतःक्षारोमृतोपमः आकर्ण्यैत्थंरु-
षाव्याप्ताकमलाकमलापतिं १८ उवाचपरुषवाक्यचारिपूर्णाश्रुलोचना क्ष्मातलंविचरंत्येतद्दिजामत्ताइवप्रभो १९ क
थंत्वभीतभीतेवअपराधंक्षमिष्यसि ननेजानामिचरितंयादित्वंजगद्गीश्वरः २० एवंजल्वपरामायांआलिंग्यसात्वयन्
मुहुः अथास्मिन्दिवसेमायाविमानवरमाश्रिता २१ जगामकौतुकद्रष्टुंसागरेजलवासिनाम् एवसासखिभिःसा
र्द्धंतीरमब्धेरगात्तदा २२ तत्रदृष्ट्वाश्रमंतस्यअगस्तेःपितृवैरिणः आगतासखिभिःसार्द्धंपूर्वद्वेषमनुस्मरन् २३
किंचिदुद्दिश्यकलहंकृत्वाशापंददौमुनेः काशीवियोगदुःखेनतस्याःशापंविजानतः २४ शशंसुस्तस्यतेशिष्यास्ते-
षामपिशशापसा तस्याःशापभयात्त्वाङ्गःपलायनपरोयदा २५ मृगोभवत्वरण्येतिममवाक्यान्नसंशयः एवमुक्ता
गतालक्ष्मीस्ततःसमुन्निस्तमः २६ अगस्तिर्नामवृक्षोभूद्गास्तिःकुंभसंभवः तिलोऽपितिलवृक्षस्यात्सर्षपो
यवधान्यकः २७ मधुमधुकवृक्षस्यात्कुशतृणविशेषकः भृंगोऽपिभृंगराजस्यखड्गःखड्गविशेषकः २८ तस्याःशा
पेननेसर्वेवनेवृक्षत्वमागताः एकत्रैवस्थिताःसर्वेरण्यखड्गस्तत्रैवनिष्ठति २९ इतिश्रीभविष्योत्तरपुराणेनारदाब
रीषसंवादेभाद्रपदमासमाहात्म्येहाविंशोऽध्यायः २२ ७ अंबरीषउवाच कथंशापाद्विनिर्मुक्तो-
भगवान्कुंभसंभवः तदहंश्रोतुमिच्छामिपरंकौतूहलंमम १ नारदउवाच गोदायाश्चतटेरम्येरक्षोभिर्नि-
र्मितंपुरम् दशग्रीवस्यदौहित्रोबानापील्वलकादयः २ रक्षोभिर्बहुभिःसार्द्धंतत्रराज्यंप्रचक्रिरे अथतेब्राह्म
णैःसार्द्धंविद्वेषंचक्रुरन्वहम् ३ कृत्रिमंवेषमास्थायगंगातीरमुपाश्रिताः गृहेस्माकंपितृदिनमागंतव्यंद्विजो-
त्तमाः ४ इतिविज्ञाप्यचानीताब्राह्मणावेदपारगाः अन्नानिइल्वलोभूत्वावातापीश्राद्धकर्मकृत् ५ गत्वातदु
दरेतेषांनिर्गमेप्राणहारकाः एवंहताश्चबहवोब्राह्मणाः श्राद्धकर्मणि ६ दिनेदिनेप्रकुर्वाणःश्राद्धानिसबहून्यपि

७ एवंवस्कमतीजातान्भ्रान्ह्कर्मविवर्जिता बभुक्षिताश्चपितरोजलाहारविवर्जिताः ८ हताःकेचिद्द्विजास्तैस्तु नद्ध
यात्केपलायिताः नैवोर्व्यामभवत्कर्मस्वल्पंपंचस्कनादिकम् ९ देवास्तेमृतपानेनचक्रुर्मर्णस्यरक्षणम् अनन्यग
तयःसर्वेअग्निष्वात्तादयस्तदा १० ब्रह्माणंशरणंजग्मुःकर्यंजीवामहेवयम् ब्रह्मणासहतेसर्वेवैकुंठपुरमाययुः
११ विष्णुनिवेदयामासुःसोब्रवीत्कमलासनम् गच्छध्वंशंकरंसर्वेसदुःखादुद्धरिष्यति १२ वैष्णवांगिरमाक
र्ण्ययययुस्तेशिवसन्निधौ शिवनिवेदयामासुर्वृत्तांतपूर्वसंभवम् १३ निदध्यौसचिरंशंभुस्तानुवाचयथातथम् ए
तेविप्रकुलोत्पन्नाराक्षसादनुजाधमाः १४ ब्राह्मणा हिषिणस्तेषांकेशादिभ्योभयंनहि अतोयूयंभवभूत्वाद्विजरक्षे
निवेदितुम् १५ सचेतानूक्षणमात्रेणघातयिष्यतिनिश्चितम् ब्राह्मणउवाच कोऽसौद्विजवरःप्रोक्तोयएत
घातयिष्यति १६ शिवउवाच किमिदंपृच्छसेब्रह्मन्ननशावद्विदोमम सर्वेषामृषिवर्यानांश्रेष्ठंयोगीः
श्वरविदुः १७ एतांप्रियमिवोवाचश्रुत्वैवंमतिदुःखितः अनाथमिवतंसर्वेनत्वाकंभूतलंययौ १८ भ्रमंतेबहु
कालेनयाज्ञवल्क्याश्रमंगताः तंदृष्ट्वासूर्यसंकाशंज्वलंतमिवपावकम् १९ तेजसादित्यसंकाशं नशशाकविलोकि
तुम् ततःपितृगणास्तस्येदडवत्निपपातह २० ध्यानंविसृज्यसमुनिर्ज्ञात्वातस्याभिकांक्षितम् सौम्यरूपंसम
भवत्उवाचमधुरंवचः २१ याज्ञवल्क्यउवाच किमर्थमागतायूयंत्यक्त्वालोकंचपैतृकम् पितरऊचुः
ब्रह्मन्दयानिधेस्वामिन्देवैस्त्वांप्रेषितोधुना २२ वातापेश्चविनाशायास्माकंदुःखमुक्तये कुरुष्वतूर्णमखिल
बहुकालवुभुक्षिताः २३ नानुवाचाथयोगीशोज्ञानमस्तिपुराकिल परमत्रकथंकार्यकर्तांशापविमोहितः २४
अत्रवःकथयिष्यामिउपायंसर्वशंकरम् स्नातोगव्यूतिमात्रेतुअगस्तेराश्रमोमहान् २५ तत्रलक्ष्म्याःप्रकोपेनशप्तात्
क्षत्वमागताः अगस्तिर्नामदृक्षोभूद्गोस्तिःपरमद्भुतः २६ तस्यच्छायांसमाश्रित्यसेवांकृत्वाजलादिभिः मदुद्दि

ष्टेनयुक्तेनकुर्वतांजपमुत्तमम् २७ तस्यप्रभावात्सुप्रीतोभवत्साभिध्यमेष्यति हनिष्यतिमहान्घोरान्दैत्यान्सु
लोक्यपीडितान् २८ अद्यैवस्थीयतामस्ययतःश्राद्धंकरोम्यहम् इतितस्यगिरंश्रुत्वास्थित्वाभुक्त्वाचनिर्गताः २९
तेनोक्तंकुर्वतस्तोत्रंपुनश्चक्षुधयायुताः पुण्यान्वितस्यवृक्षस्यभक्षयंत्यस्थिलानूयवान् ३० पत्राणिभृंगिराजस्य
कुशैरास्तरणंतथा भोजनमधुपर्णेचपात्रंवटुमृगस्यच ३१ तथैवमधुवृक्षस्यमक्षिकाभिःकृतंमधु भक्षयंतश्च
तेसर्वेक्षुधयापरयायुताः ३२ एवंपक्षेत्वतिक्रांतेसंतुष्टोमुनिसत्तमः गोचरोभूद्दिंद्रियाणांमुनीनांप्रवराभुवि ३३
ततस्तेपितरःसर्वेकृत्वापादाभिवंदनम् ब्रह्मलोकंपुटाःसर्वेस्तुतिस्तोत्रंप्रचक्रमुः ३४ इतिश्रीभविष्योत्तरपुरा
णेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येत्रयोविंशोऽध्यायः २३ ॐ पितरऊचुः वेदशास्त्रपुराण-
ज्ञसर्वागमविशारद नमस्कृभ्यंत्रिकालज्ञकुंभयोनेनमोनमः १ स्मरवदारिबललोकानांसंयातयामिणेनमः इत्वला-
दिभयत्रस्तावयंतेशरणागताः २ त्राहिनःसर्वदुःखेभ्योभूमिदेवनमोस्तुते नारदउवाच इतिस्तुत्वातसर्व
नःप्रोवाचास्यघटोद्भवः ३ अगस्तिरुवाच ज्ञातमेवभवत्कार्यंपरशापसमावृतः मुक्तःसंश्चकरिष्यामिभव
च्छोकनिवारणम् ४ पितरऊचुः कथत्वशापसंयुक्तःकस्मान्मुक्तिर्भविष्यति अगस्तिरुवाच लक्ष्म्याक्रु
तमिदंसर्वमज्ञानोच्छापकारणम् ५ तामानयध्वंत्वरयाशापमुक्तिंकरिष्यति ततःपितृगणाःसर्वेवैकुंठंत्वरयाय-
युः ६ तानिवेद्यरमासार्द्धंश्चानिन्युःपीतवाससं सोपिदृष्ट्वामुनिवरःसाष्टांगंप्रणनामच ७ स्तुतिंबहुविधांकृत्वा
प्रार्थयामाससादरम् तंदृष्ट्वालक्ष्मितासाध्वीप्रणनामाब्धिसुस्वी ८ स्त्रीत्वादज्ञानयुक्तत्वाद्यत्कृतंदुष्कृतंमया तं-
क्षमस्वकृपासिंधोहंतवास्मिचपुत्रिका ९ एवंविवदमानायाविष्णुनाप्रार्थितासती वृद्धादाधिरभूत्सद्योययापूर्व
नृकेसरी १० ततोदेवाःसगंधर्वाऋषयश्चतपोधनाः आगतादृष्टनार्थायस्तुवंतोविविधैस्तवैः २१ नेदुर्दुंदुभयः

स्वर्गेपुष्पवृष्टिःपपातह ततःप्रार्थयतःसर्वेहन्यतांइत्वलादयः १२ तथेत्युक्तामुनिवरागताःसर्वेनिजालयम् शिष्यैःपि
तृगणैःसार्द्धइत्वलंहंतुमाययौ १३ वातापीरित्वलश्चैवतथान्येनिशाचराः निहन्युःक्षणमात्रेणसमिधोग्निर्यथातृणं
१४ गंगातीरंसमासाद्यद्विपक्षमुषितास्ततः ततःपितृगणान्सर्वान्दत्वाह्यांस्वयमाययौ १५ लिंगंरामेश्वरंदृष्ट्वा
शीविरहपीडितः ततःप्रभृतितेसर्वेअगस्त्याद्यामहीसुराः १६ माक्षिकरवङ्गपात्राणिपितृवल्लभतांगताः तैर्विना-
येप्रकुर्वंतिश्राद्धंतानविमोहिताः १७ तत्सर्वंनिष्फलंतेषांकंतारोनिरयंव्रजन् भाद्रस्यापरपक्षेचमुनिवृक्षसमाश्रि-
ताः १८ कंदमूलफलाहाराःक्षुधयापीडिताभृशम् मृत्युलोकस्थितायस्यात्तस्माद्यत्नंकारयेत् १९ प्रत्यूहपक्षप-
र्यंतंसार्द्धंसर्वैर्द्विजातिभिः पक्वान्नैःपायसैःपूपैर्मधुरखंडघृतादिभिः २० भक्ष्यैर्भोज्यैर्लेह्यचोष्यैर्व्यंजनैर्व्यंजनांतरैः
अतृप्तिस्तृप्तिपर्यंतंब्राह्मणान्भोजयेत्तथा २१ तथैवपिंडदानानिकार्याणिप्रतिवासरम् अगस्तिवृक्षमाश्रित्यपिं
डदानंकरोतियः २२ तस्यपितृगणाःसर्वेतृप्तायांतिपरांगतिम् यावंतःसंतिसिक्थानितावद्वर्षशतानिच २३ तृप्य
तिपितरःसर्वेगयास्करशिरेयथा अभावेतस्यपुष्पाणिभृंगिराजदलानिच २४ दर्भैरास्तरणंकार्यंपूजनंचयवैस्तिलैः
ब्राह्मणान्मधुपर्णेषुमाक्षिकार्द्रयुतेषुच २५ एतैरेवहियच्छ्राद्धंगयाश्राद्धसमंभवेत् अशक्तेनैवदिवसःकार्यंभक्तिपु
रःसरम् २६ सकदेचतदाप्राप्तेतत्कार्यंवृश्चिकावधि यतःसर्वेपितृगणास्तुलासंस्थेदिवाकरे २७ गंगातीरंसमासा
द्यस्वर्लोकंवृश्चिकेततः अतःक्षाम्यंतितेसर्वेश्राद्धार्थंवृश्चिकावधि २८ ततोनिराशागच्छंतिशापंदत्वासुदारुणम्
येनकुर्वंतियेमोहात्ततश्छ्राद्धंवृश्चिकावधि २९ तेयांतिनिरयान्घोरान्पुत्रदारविवर्जिताः एवंप्रोष्ठपदेमासिपूज्यः
सर्वगुणैरपि ३० यइमाश्रावयेद्वाथापितृश्राद्धदिनेदिने नेपितृलोकमक्षय्यंयातिब्रह्मसनातनम् ३१ इतिश्रीभ॰ २१
भाद्रपदमासमा॰ चतुर्विंशोऽध्यायः २४ ॐ नारदउवाच शुक्लप्रोष्ठपदेचैवश्रवणर्क्षसमन्विता द्वादशीसर्वपाप

श्रीदुर्लभाभुविमानवैः १ तस्यामाविरभूत्साक्षाददितेर्लोकविश्रुतः बलिदैत्यविनाशायवामनोदैत्यवामनम् २ वामने-
तिसमाख्यातासर्वपापप्रणाशिनी अस्याव्रतविधिःपूर्वंमयापृष्टःपितामहः ३ यस्यश्रवणमात्रेणश्रृण्वतांरोमहर्षणम्
सर्वपापप्रशमनंसर्वशास्त्रेषुगोपितम् ४ ब्रह्मावाच शृणुष्वावहितोब्रह्मन्कथ्यमानुमयानघ तिथिनक्षत्रसंयो-
गमुपकारकरन्नृणाम् ५ अल्पायासेननुमहत्फलंतुप्राप्यतेनरैः नारदउवाच श्रवणेनसमायुक्ताद्वादशीयदिजा
यते ६ शुक्लपक्षेद्विजश्रेष्ठविजयासाप्रकीर्तिता एकादश्याप्रोष्ठपदेश्रवणंवर्ततेयदि ७ उत्पन्नोभगवान्विष्णुर्दृ्वा
नाहितकाम्यया पुरादेवगणैःसर्वैःसमेत स्तुमहर्षिभिः ८ वरदोयाचितोविष्णुरिद्राग्न्यनिलसंयुतैः बलवानजितोदै
त्योबलिनाममहाबलः ९ तेनदेवगणाःसर्वेजिताःनाथत्रिभिर्दिवान् जहिदैत्यंमहाबाहोबलिंबलवतांवर १० श्रुत्वा-
विष्णुस्तदावाक्यंदेवानांकरुणान्वितम् विष्णुरुवाच जानेवैरोचनेःपुत्रंबलिंत्रैलोक्यकण्टकं ११ मद्भक्तमद्गतप्राणंस
त्यसंधंमहाबलम् समाद्यश्रियंतस्यतदादास्येदिवौकसा १२ अदितिर्मांप्रपन्नावैपुत्रार्थेपुत्रकांक्षिणी तस्याश्च-
भीप्सितंदेव्याःकरिष्येनात्रसंशयः १३ गच्छध्वंनिरुद्विग्नाकिंचित्कालःप्रतीक्ष्यताम् एवंश्रुत्वागतादेवाःकार्यंविष्णो-
र्निवेदयन् १४ अथकालेबहुगतेजातासागर्भिणीप्रभो प्रसूतानवमेमासिपुत्रंसावामनंहरिम् १५ ह्रस्वंस्वरूपदंदे
वंदृष्ट्वहृत्कंदत्वरान्वितम् दृष्ट्वातंवामनंजातंसादितिर्मुदितात्यभूत् १६ एकादश्यांभाद्रपदेयच्छत्याचनरोत्तम भ
यंबभूवदैत्यानांदेवानांतोषवर्द्धनम् १७ त्रिबद्धमेखलोदंडीनथायज्ञोपवीतवान् रुरुकृष्णाजिनधरःकमंडलुविभू
षितः १८ बलेर्बलवतोयज्ञंजगामबहुविस्तरम् दृष्ट्वाबलिस्तंप्रोवाचकिंप्रार्थयसिमेप्रभो १९ अर्थीयज्ञपतेर्धीमन्
दीयतांमेदिनीमम पदत्रयप्रमाणेनमत्वस्यार्थेमहीपते २० दत्तादत्तातुतेब्रह्मन्बलिःप्राहद्विजोत्तमम् शुक्रस्तुवच
नंश्रुत्वाकार्यमालोक्यतामिदम् २१ आदौक्षिप्रंनकर्तव्यंमहीदानंमहीपते मायारूपधरोभूयात्मायारूपंप्रजायते

२३ तस्मात्कार्यप्रयत्नेनवाक्यंममहीपते ततश्चात्तदृदेहोसौकमंडलुमवीविशत् २४ भार्गवोपिहितद्वाराजलंनैवपपात-
ह कुशेनातुद्यतद्वारंभित्त्वाचक्रुर्भृगुस्तथा २५ ब्रह्मचारीबलिंप्राहदानंकुरुयथाविधि कमंडलुजलेनैवददौतस्मैमहीमिमां २६
ततोवर्धितुमारेभेवामनोनंतविक्रमः भूमेरुपादंप्रतिष्ठाप्यलोकत्रयमथाक्रमन् २७ प्रथमेनधराव्याप्ताद्वितीयेनपदादियत् नृपा
दस्यतृतीयंतुस्थानंलेभेप्रजापते २८ ततोबलिरुवाचेनवामनंज्ञातविक्रमम् मस्तकेमेतृतीयंतुपदंधारयवामन २९ बलेर्वचना
माकर्ण्यतथेतिवामनोब्रवीत् हरिराहबलिंशीघ्रंगच्छपातालकंप्रति ३० तत्रत्वमीप्सितान्भोगान्भुङ्क्ष्वमद्वाहपालितः अस्य
त्वद्वस्यावसानेत्वमेवेंद्रोभविष्यति ३१ एतच्छ्रुत्वाबलिःप्रीणान्नमस्कृत्वाजनार्दनं विसृज्यैवबलिंदेवोलोकपालानुवाचह ३२
स्वस्थानंप्रतिगच्छध्वंसर्वेदेवगणास्तथा एवंश्रुत्वागतादेवाहृष्टंसपूज्यवामनं ३३ एवंकृत्वादेवकार्यंतत्रैवांतरधीयत एतत्स
र्वंसमभवत्पुराकादश्यानरोत्तम ३४ विधानंतस्यवक्ष्यामिशृणुष्वगदतोमम. नारीवापुरुषोवापियःकुर्याद्विधिवद्व्रतम् ३५ ब्र
ह्मणोदिवसोयावत्तावत्स्वर्गेमहीयते कृत्वासौवर्णकंदेववामनंभूतभावनम् ३६ उपोषितोनरोभूम्यास्थापयेत्प्रतिमांशुभां पू
जयेत्प्रथमंविप्रदेवदेवंजनार्दनं ३६ ततस्तस्याग्रतःशुभ्रन्यसेत्कृष्णाजिनंबुधः कृशानास्तीर्यसाग्रांश्चचंदनागरुधूपितान् ३७
तस्योपरितिलानांचकृष्णानामाढकंन्यसेत् मध्यमःप्रस्थमेकंतुदरिद्रकुडवंन्यसेत् ३८ तिलाभावेयवाःप्रोक्तागोधूमास्तदभ
वतः मुख्यंतत्रतिलैर्ब्रह्मन्संपूर्णंप्राप्यतेफलम् ३९ तेषामुपरिसौवर्णंवामनंविन्यसेद्बुधः ततःसंपूजयेद्देवंभक्त्यायुक्तोज-
नार्दनं ४० मत्स्याद्यादेप्रथमजंकूर्मायेतिकटितथा वराहायेतिजठंनृसिंहायेतिवैउरुः ४१ वामनायेतिकंठेतुबलिद्वारस्थिता-
यच वामेपरशुरामश्चभुजौरामायनेनमः ४२ कृष्णान्ललाटनेत्रेचबौद्धनाम्नानथाशिरः. मत्स्यकूर्मावराहश्चनारसिंहोःथवा-
मनः ४३ रामोरामश्चकृष्णश्चबौद्धःकल्कीचनेदश ध्यानमेविधिनापूज्यवामनंभक्तिसयुत ४४ ततस्तस्याग्रतस्तत्रविधिभक्तघट
न्यसेत् करकसोदकंतत्रसुगंधैश्चसमन्वित ४५ छत्रंकृष्णाजिनंतत्रपादुकेकुंडलेतथा नैवेद्यंविविधंभक्ष्यंसर्वंतच्चनिवेदयेत्

४६ ततःप्रभातेविमलेस्नात्वाहुत्वाहुताशनं दद्यात्तद्विजवर्यायवामनंतिलसंयुतं ४७ जयाचेतिसमाख्यातासर्वपापप्रणाशिनी उपो
ष्यासाप्रयत्नेनसर्वान्कामानवाप्नुयात् ४८ गच्छविष्णुपदंदिव्यंक्रीडस्वकालमक्षयम् इहागत्यभवेद्राजाशत्रुपक्षक्षयंकरः ४९ पुत्रपौ
त्रपरिवृतोजीवेच्चशरदांशत उपोष्यद्वादशीतत्रसंगमेस्नानमाचरेत् ५० दानंदध्योदनंतत्रउपवासपरोव्रती ५१ इतिश्रीभ० भा०
वामनावतारवर्णननामपंचविंशोऽध्यायः २५ ऋ ब्रह्मोवाच केनचेदंपुराचीर्णमर्त्येकेनप्रकाशितं एतत्समस्तंविस्तारंकथय
स्वमुनीश्वर १ नारदउ० हरिदत्तइतिख्यातोवणिक्धर्मविशारदः स्वभार्यांविविधाकारंप्रगृह्यबहुवामनः २ जलमध्येतुनद्यिंस
भाडतस्यद्विजोत्तम निर्गतोजलमध्यात्तुवणिक्धर्मविशारदः ३ निर्दृष्टेनिजलेदेशेवायुनातत्रपीडितः तत्रसंप्राप्तवान्मार्यमरुदेशं
निराश्रयम् ४ सदद्दर्शमहांतंचवटवृक्षंकिलोन्नमम् क्रोशमात्रंपृथुत्वेनाद्भुतंचतथोन्नतम् ५ साद्रजीमूतसंकाशंवटवृक्षंस
दृष्टवान् पिशाचानांगणास्तत्रनानारूपधरास्तथा ६ भीषणानांविरूपाणामनेकानांसहस्रशः तेषांमध्येमहाकायःस्फुरूपःशुभदर्शनः ७
तत्रोपविष्टाःसर्वेतेवटच्छायांसमाश्रिताः माध्याह्नेचनदासर्वेतृषार्ताश्चबुभुक्षिताः ८ एतस्मिन्नंतरेविप्रशिष्यमेकमुपस्थितं वटच्छायांस
मासन्नंजलपात्रसमन्वितं ९ तंदृष्ट्वामुदिताःसर्वेपिशाचाक्षिप्रमूचिरे देहिदेहिजलंसर्वमन्नंसर्वेबुभुक्षिताः १० शिक्यस्थमन्नमानी
यसर्वेभ्यःसंप्रयच्छत वैश्यायचददौचान्नंपानीयंचानिंद्यभिक्षवः ११ ततोभुक्ताःस्वयंतेतुउपविष्टाःस्ववासने तंपप्रच्छततोवैश्यः
पिशाचाधिपतिंतदा १२ पीतेतथैवपानीयेकिमाश्चर्यमभूदिदं प्रेताःसर्वेऽस्तुवन्मध्येपुण्यंतच्चकिमद्भुतं १३ एतत्सर्वंप्रयत्नेनवद
सर्वममाग्रतः पिशाचपतिरुवाच अहमासंपुराराजाबहुभृत्योमहाबलः १४ तत्रमकुर्वतोराज्यमन्यायाबहवःकृताः विधवा-
श्चमयार्तावस्फरूपाभोगिताबलाः १५ एवंपातकजालेनकुर्वतापापमुत्कटं एवमाचरतापापंकृतंराज्यमयापुरा १६ पुरोहितोम-
यादृष्टोततोगृहमुपागतः सचविप्रमयापृष्टःकिमर्थंत्वमुपागतः १७ ततश्चकथितंतत्रश्रवणद्वादशीव्रतं फलंतस्यद्विजश्रेष्ठमम
देहिद्विजोत्तम १८ पुरोहितेनतत्सर्वममदत्तंपुरानघ पूजितश्चमयाविप्रोदत्वाभूमिंहिरण्मयीं १९ चंदनंचुगवादत्तंवस्त्राणि

कांचनानिच पिशाचत्वमध्येराजाहंश्रवणद्वादशीव्रतात् २० एतेनसर्वेपापिष्टाःपिशाचत्वमुपागताः मांवहंतिवनान्नित्यंभ्रमंतःक्षुधाकामाबुभुक्षिताः २१ उपोषितबलेनैवजातिस्मरणमुत्तमम् दधिभक्षप्रदानेनजलांतंचाक्षयंत्विदम् २२ एतत्सर्वंमयाख्यातंदृष्टंचयद्वापिकृसुत उपकाशयसर्वेषांयद्ब्रवीमिशृणुष्वतत् २३ राजधान्यामयान्यस्तंसौवर्णंभूगतंमम मयातेकथितंवैश्यशमीवृक्षमधिष्ठितं २४ तदादायत्वमद्यैवगयागच्छममाज्ञया तत्रपिंडाःप्रदातव्याःसर्वेषांहितकाम्यया २५ पिशाचानांचसर्वेषांयथापापक्षयोभवेत् ततस्पुटिकाहस्तेसर्वेषानामगोत्रकं २६ संलिख्यनामगोत्रादिकुरुश्राद्धादिकांक्रियां श्रुत्वावाक्यंपिशाचस्यतथेत्युक्त्वाजगामसः २७ राजधान्यांततोगत्वातदादायधनमहत् गत्वागयांचमेधावीपरोपकरणेरतः २८ ददौपिंडान्पिशाचानांनामगोत्राणिसर्वशः तेनपुण्येनतेसर्वेविमानस्थास्तमूचिरे २९ साधुसंगोनहिव्यर्थाकदाचिदपिजायते कालेनफलतेतीर्थंसद्यःसाधुसमागमः ३० एवमुक्त्वागताःसर्वेविमानैःसूर्यसन्निभैः हरिदत्तोपिनान्सर्वान्समुद्धृत्यजगामसः ३१ स्वदेशेचस्वकंदारस्वगृहंचासदत्पुनः ३२ एतत्सर्वंमयाख्यातंश्रवणद्वादशीव्रतं भार्यासहव्रतंतेनचरितंचयथाविधि ३३ असमर्थोपियःकश्चिच्छृणुयादपिभक्तितः सोपिसद्गतिमाप्नोतिमुनेतत्सर्वकिल्बिषात् ३४ विष्णुलोकमवाप्नोतिभुक्त्वाभोगान्ययेप्सितं एतद्व्रतंविधानेनब्रह्मणाकथितंमम ३५ तत्सर्वंकथितंतेद्यविस्तारेणयथातथम् तत्कुरुष्वविधानेनसर्वकामसमृद्धये ३६ व्रतमेतन्नकुर्वंतिमासव्रतपरायणाः तेषांविफलतायांतिसर्वमासकृतंव्रतम् ३७ इतिश्रीभविष्योत्तरपुराणेभाद्रपदमा० वामनारव्यानन्नामषड्विंशोऽध्यायः २६ ७

ऋषयऊचुः अस्मिन्मासेविशेषेणस्त्रीभिःसौभाग्यसिद्धये कर्तव्यंचव्रतंदानंतदेवकथयस्वनः १ सूतउवाच साधु साधुमहाभागास्तद्वक्ष्यामियथातथम् नभस्यस्यत्रयोदश्यामारभ्यत्रिदिनंव्रतम् २ गोत्रिरात्रमितिख्यातंनारीणांसुखदायकं ब्रह्मक्षत्रियविट्शूद्रैस्तथाचेतरजातिभिः ३ स्त्रीभिर्वापुरुषैर्वापिकामुकैर्वामुमुक्षुभिः ऋषयऊचुः त्वयायत्कथितंसूतगोत्रिरात्रव्रतंशुभम् ४ तत्समासेननोब्रूहिकृपयाऋषिसत्तम एवमेवपुरापृष्टःपुलस्त्योभगवान्ऋषिः ५ इंद्रद्युम्नेनजगतिनारी-

णामुपकारकम् इंद्रद्युम्नउवाच भगवन्कर्मणाकेननारीणांप्राप्यतेध्रुवम् ६ रूपंसौभाग्यमतुलंसर्वान्कामांश्चनहृद्ग पु
लस्त्यउवाच राजंस्तवाहंवक्ष्यामिव्रतानामुत्तमंव्रतं ७ तीर्थानामुत्तमंतीर्थंपुण्यानामुत्तमोत्तमं गावःपूज्याश्चवंद्याश्चगावो
मेदैवतंमहत् ८ पूजनीयाःसदाभक्त्यागावोलोकस्यमातरः अग्निहोत्रायविप्राणांदेवानामर्चनायच ९ पूजयेदसकृत्तास्च
किंभूतमधिकृतनः गोरोचनंतुमांगल्यंपवित्रार्थस्यसाधनम् १० गोमूत्रात्गुग्गुलोजातःसुगंधीप्रियदर्शनः आहारःसर्वदेवा
नांशिवस्यचविशेषतः ११ सर्वस्मादधिकंसर्वज्ञेयंगोरसमुत्तमम् दद्यात्सर्वाणिजातानिमांगल्यान्यर्थसिद्धये १२ घृतसंभू
तममृतंदेवानांतृप्तिकारकम् ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतम् १३ एकत्रमंत्रास्तिष्ठंतिहविरन्यत्रजायते गोभिं
र्यज्ञाःप्रवर्तंतेगोषुतीर्थानिसर्वशः १४ गोभिर्वेदाःसमुद्दीर्णाःसषडंगपदक्रमात् शृंगमूलेगवांरुद्रःब्रह्माविष्णुश्चसंस्थि
ताः १५ शृंगाग्रेसर्वतीर्थानिस्थावराणिचराणिच शिरोमध्येमहादेवःसर्वकारणकारणम् १६ ललाटेसंस्थितागौरीतयोम
ध्येचषण्मुखः कंबलेतरबोनागानासापुटमवस्थिताः १७ कर्णयोरश्विनौदेवौनेत्रयोश्चप्रभाकरौ दंतेषुवायवःसर्वेजिह्वाया
वरुणःस्थितः १८ संध्यात्रयंतदोष्ठेषुग्रीवायांचपुरंदरः रुद्राणीकाकुदेचैवपाणिभ्यांचव्यवस्थिता १९ चतुष्पदेषुसकलोधर्मोनि
त्यंसन्निष्ठति खुरप्रदेशेगंधर्वाःखुराग्रेपिचपन्नगाः २० खुराणांपश्चिमेभागेराक्षसाःसंनिसर्वदा एकादश तथारुद्राःपृष्ठदे
शेव्यवस्थिताः २१ तासांत्रैलोक्यमात्तृणांवसवःसर्वसंधिषु श्रोणीतटस्थाःपितरोगुल्फदेशेषुमातरः २२ श्रीरपानेगवांनित्यं
स्वाहालांगूलमाश्रिता यत्रत्रिंशत्कोटिसुरारोमकूपेष्यवस्थिताः २३ उदरेपृथिवीसर्वासशैलवनकानना चत्वारःसागराःप्रो
क्तागवांचापिपयोधराः २४ पर्जन्यःक्षीरधारासोसप्रश्चावेतयाजलं गवांपुच्छेवसेध्यमोंजघायांवास्तुरेवच २५ आदित्यरश्म
यश्चरोगोमयेयमुनास्थिता जठरेगार्हपत्योग्निर्दक्षिणाग्नित्वदिस्थितः २६ मुखेत्राहवनीयोग्निर्वेदाश्चत्वारएवच सर्वदेवमयी
गावःसर्वगावमयाःस्मृताः २७ एवंप्रभावोराजेंद्रइंद्रद्युम्ननिबोधच पूजितावंदितागावःसर्वकामफलप्रदाः २८ तासांव्रतंत्रि

रात्रंतुसर्वपापापहंनृप २९ इतिश्रीभवि० भाद्रप० गोत्रिरात्रिव्रतविधानेसप्तविंशोऽध्यायः २७ ऋ राजोवाच क
स्मिन्मासेतियोकस्यांव्रतंकार्यमनुत्तमं नारदउवाच मासेभाद्रपदेमासेपितॄणांतृप्तिकारके १ शुक्लपक्षेत्रयोदश्यांनियमस्थो
भवेद्व्रती ब्रह्मचारीभूमिशायीशुचिःसंजितमानसः २ दिनत्रयेव्यतिक्रांतेपरिपूर्णव्रतंतव करिष्येपारणंप्राप्तेव्रतमेपूर्णमस्त्विति
३ व्रतत्रिरात्रमुद्दिश्यतिष्ठेद्वोस्थानमध्यतः ततोमध्यान्हसमयेनद्यादौस्नानमाचरेत् ४ तदभावेऽथराजेंद्रगोवाटेस्नानमाचरेत् स
वैतीर्थमयोयस्मात्गोवाटःसद्भिरुच्यते ५ गोरसर्षपकल्केनगात्रमुद्वर्तयेद्व्रती दूर्वामृद्वोमयांभोभिःसाक्षतैःस्नानमाचरेत् ६
यःस्नात्वोपास्यसंध्यांचसतर्प्यपितृदेवताः मौनीगोवाटमास्थायगवांकुर्यात्प्रदक्षिणं ७ तत्रास्थाप्यशुभंकुंभंसान्नंस्वर्णसमन्वि
तं पात्रमौदुंबरंकुर्यात्दिव्याक्षतप्रपूरितम् ८ लक्ष्मीनारायणःकार्यःशुल्याहेममयोनृप लक्ष्मीयुतश्चतुर्बाहुर्नानालंकारमं
डितः ९ प्रतिष्ठाप्यशुभैर्मंत्रैर्वेदोक्तैःस्नापयेत्ततः विलेप्यशुभैश्चंदनैःपूजयेत्कुसुमैःशुभैः १० परिधाप्यशुभैर्वस्त्रैःपुष्पमंड
पमाचरेत् घृतपक्वतुनैवेद्यधूपःकृष्णागरुःस्मृतः ११ एवंकृत्वाशुभापूजासर्पिषादीपमाचरेत् त्रिदिनंनरशार्दूलसयुसंदेवसन्नि
धौ १२ फलेननारिकेलेनतथापंचयुतेनच अर्घस्तस्मैप्रदातव्योदेवदेवायचक्रिणे १३ सप्तधान्ययुतेनापिवंशपात्रप्रपूरितः भगवन्दे
वदेवसंसारार्तिप्रणाशन १४ लक्ष्म्यासहजगन्नाथगृहाणार्घ्यंनमोस्तुते ततोनीराजनंकुर्यात्सकल्पविधिमाचरेत् १५ नमस्कृत्य
हरिंपश्चात्पूजयेद्वासवत्सकां क्षीरोदधिसमुद्भूते यज्ञार्थेत्रिदिवौकसः १६ गनिस्त्वंसर्वदेवानांगृहाणार्घ्यंप्रसीदमे चंदनैःकुंकु
मैर्वस्त्रैर्हेमभूषणभूषितैः १७ घंटादिभिरलंकारैरलंकृत्यकृतांजलिः ददातिचसतांधेनुदत्तातारयतेध्रुवम् १८ पूजितावस्तुता
सावैसौख्यंपुत्रान्ददातुमे दद्याद्घृतंततोधेनोःफलैःकालोद्भवैःशुभैः १९ भूरिणाबलिदानेनपरितोषसमाचरेत् एवंविधिप्रपू-
ज्याथव्रतंकुर्याद्दिनत्रय २० रात्रौजागरणंकार्यनृत्यगीतकथानकैः गवांमाहात्म्यमतुलंश्रोतव्यंभक्तिभावतः २१ वैष्णवंचरितंपुण्य
पुण्यार्थंगीतमाचरेत् चतुर्थेदिवसेप्राप्तेपुनःपूजांसमाचरेत् २२ सपत्नीकान्द्विजान्राजन्भोजनार्थंनिमंत्रयेत् द्वादशाद्यैस्तदा

रान्चतुरोवास्वशक्तितः २३ भोजयेद्विविधैरन्नैर्मंडकैःपायसेनवा अभुक्तेभ्य स्ततस्तेभ्य स्तांबूलंदक्षिणान्वितं २४ दद्याद्वासां स्यलंकारान्माल्यचंदनसंयुतान् दद्याद्वशास्यपात्राणिविरुदैःपूरितानिच २५ पक्वान्नैर्नारिकेलैश्चनयेचविविधैःफलैः पूजांकुर्या-द्योषितांचभर्तृभिश्चसमन्विताः २६ आचार्यंसकलत्रंचवासांसिपरिधापयेत् दंपती सदलंकारैर्हेमनिष्केप्रपूजयेत् २७ गांचसो पस्करांदद्यात्सुशीलांचपयस्विनीं सदक्षिणांसवत्सांचवस्त्रालंकारभूषिताम् २८ गुरवेप्रतिमांविष्णोः सोपस्काराप्रदापयेत् मं-त्रेणानेनभक्त्याचविष्णुर्मेप्रीयतामिति २९ स्रुवास्रुनीद्विजान्सर्वान्प्रणिपत्यक्षमापयेत् गोष्ठंयावत्व्रजेत्सृष्ठगीतनृत्यपुरःसरं ३० गोपानांचैवपाथेयंदेयंपूपकदंबकम् बंधुभिर्भोजनंकुर्याद्यवैश्चगोपयोघृतैः ३१ एवंयःकुरुतेभक्त्याव्रतंत्रैरात्रकंमहत् कृ तेयत्फलमाप्नोतिएतन्मेमुखतःशृणु ३२ सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलम् तपोभिःसकलैर्यच्चतदवाप्नोत्यसंशयः ३३ एतद्व्रतंसकलकल्मषनाशनंचत्रैरात्रिकंविभवशाठ्यमपास्यकुर्यात् भूमौसपुत्रधनसौख्यमवाप्यचांतेलोकानुपैतिविधिविष्णु महेशतुष्टान् ३४ राजन्यदीच्छसिसुरवंपरमंपृथिव्यांस्वर्गेचकल्पतरुभूमिषुदिव्यलोकान् भक्त्यात्रिलोकजननीस्करभिप्रपूज्य पल्यासहव्रतमिदंविधिवत्कुरुष्व ३५ इतिश्रीभ० भाद्र० गोत्रिरात्रव्रतवर्णनंनामाष्टाविंशो ऽध्यायः २८ ६९


सूतउवाच भाद्रस्यदुर्लभस्नानंयत्रकुत्रजलाशये ऐहिकंचसुखंप्राप्यअंतेपुण्यमवाप्नुयात् १ मासंमासार्द्धमर्द्धोदिनपं चकमेवच यःस्नायाद्विधिवद्ब्रह्मन्पूर्णफलमवाप्नुयात् २ भाद्रमासस्यमाहात्म्यश्रोतव्यंप्रत्यहंबुधैः पुराणोक्तंफलंतस्यश्र-वणान्नात्रसंशयः ३ कलौनास्त्येवनास्त्येवमार्गंभवतुकिंचन ४ सर्वाधिकमिदंसूतनात्रकार्याविचारणा ५ यज्ञ स्रुयज्ञनामा नौभ्रातरौसंबभूवतुः ६ विद्युद्धोधनसंपन्नौसदासंहिततत्परौ तीर्थयात्रापरोयज्ञोयज्ञकर्मरतःसदा ७ दानानिविविधंदत्वा मृतःस्वर्गंजगामह स्रुयज्ञोनापरंवेद पुराणश्रवणाद्धरेः ८ ततोविमानमारुत्यस्वर्गंयंतंददर्शह उवाचवचनंज्ञानंरहियानंहरेःपद ९ जग्मतुर्विष्णुभुवनंविष्णुर्वचनमब्रवीत् स्रुयज्ञेनात्रवस्तव्यंयज्ञेनैवविविष्टपे १० भोक्तव्याविविधाभोगा जन्मप्राप्यपुनःकलौ

स्कयज्ञोत्रैववसतिंपुराणश्रवणेनवै ११ इतितेकथितंब्रह्मन्पुराणश्रवणात्फलं पुराणश्रवणेनैवकर्तव्यंचबुधैर्जनैः १२ नतस्यफलमाप्नोतिदुःखभाग्जायतेनरः व्यासासनंसुविस्तीर्यमृद्वासनसमन्वितं १३ रंगयित्वाधूपदीपैःशोभितंकारयेत्सदा अ॰ दौसरस्वतींपूज्यव्यासंसंपूजयेत्ततः १४ आदौचांतनमस्कारंकुर्याद्भक्तिसमन्वितः कदन्नंनात्तियोनित्यंशृणुयात्भगवत्कथां १५ समाप्यवसरेकुर्यान्मंडपंचातिशोभितं कदलीस्तंभसंयुक्तंसमग्रंतत्रपूजयेत् १६ षोडशैरुपचारैश्चपूजयेच्चसरस्वतीम् सौभाग्यद्रव्यहीनेनविरहोजायतेभुवि १७ वस्त्रहीनेनदारिद्र्यंफलाभावेवसंततिः वाद्यहीनेबधिरतानिष्फलदक्षिणांविना १८ दुःखमाप्नोतिविपुलंअंगहीनसपर्यया विष्णुस्वरूपिणंव्यासंपूजयेत्परयाधिया १९ पादप्रक्षालनंचैवदद्यादासनमुत्तमं कमंडलुसोदपात्रंवस्त्राणिविविधानिच २० अलंकारंयज्ञसूत्रंचंदनेनविलेपनं शिरोवेष्टप्रावरणंधूपदीपादिवासितं २१ नैवेद्यंश्रीफलंचैवतांबूलंविधिपूर्वकं व्यासहस्तेदक्षिणांतुयथाशक्त्यानिवेदयेत् २२ प्रदक्षिणानमस्कारमंत्रपुष्पाणिचार्पयेत् क्षमापयेन्नमस्कृत्यैतूर्यध्वनिसमन्वितं २३ सरस्वत्याचव्यासेनगत्वाव्यासगृहंमुदा पदेपदेश्वमेधस्यफलंप्राप्नोत्यसशयः २४ व्यासेसंतुष्टतायातेपुराणोक्तंफलंभवेत् शृण्वेविफलतायातिरौरवंनरकंव्रजेत् २५ अयशोमहदाप्नोतिशोचतेसौनिरंतरं २६ इतिश्रीभ॰ भाद्र॰ फलश्रुतिवर्णनंनामएकोनत्रिंशोऽध्यायः २९ ७. सूतउवाच व्यासंसंपूज्यविधिवत्पूर्णफलमवाप्नुयात् स्वशक्त्यापूजयेद्व्यासंवस्त्रालंकरणादिभिः १ शक्तेरभावाच्छुश्रूषांकुर्यात्व्यासस्यभक्तितः कंदमूलफलादीनि पुष्पपत्राणितन्मुदे २ अर्पयेत्परयाभक्त्यातस्यपुण्यमनंतकं व्यासासनंचसंस्थाप्यअर्चयित्वासरस्वतीम् ३ पुराणांतेव्यासगृहं गत्वाव्यासार्पितंचयत् निवेद्यस्वगृहंगच्छेत्पुराणोक्तंफलंलभेत् ४ यःपुराणंनिंदयतिइतिहासंकथानकं सएवरौरवंयातिकुष्टीभवतिजन्मनि ५ ज्ञानतोऽज्ञानतोवापिवाचिकंनिंदयन्नरः सभुक्त्वायातनांयाम्यांमुक्तोभवतिनिश्चितम् ६ कथ्यमानेपुराणार्थेविवादंकुरुतेनरः श्रद्धयाईर्षयावापिसदुःखंलभतेचिरम् ७ विद्ययाईर्षयाद्वेषात्सोत्कर्षात्वानराधमः योविवादय

तेमूढोव्यासपीठंस्थितंद्विजं ८ व्यासस्थानस्थितोविप्र स्तावद्विष्णुर्नसंशयः तत्पूजनात्परंश्रेयइहलोकेपरत्रच ९ पुराणश्रवणं कृत्वास्त्रियोवाब्राह्मणादयः वैकुंठभुवनंयांतिस्वशक्त्याव्यासपूजनात् १० अथशोमहदाप्नोतिव्यासस्यानर्चनाद्भवम् तिर्यग्योनिमनुप्राताशोचतेसौशकुनवत् ११ यद्दिहासीत्पुराकश्चित्ब्राह्मणोगुणशर्मकः पुराणपठनंकुर्वन्जीर्णश्चत्थस्य मूलके १२ यदृच्छाश्रवणंकुर्युस्तत्रस्थायेद्विजोत्तमाः अदत्तदक्षिणास्तांश्चशकुंतावाक्यमब्रवीत् १३ तस्यचाश्वत्थरूक्षस्यस्मरन्स्वानुभवंमुहुः पुराणश्रवणेचैवकर्तव्यंभोद्विजोत्तमाः १४ पुण्येनाविधियोगेनपक्षियोनिमुपागताः ब्राह्मणउ० कथंवोपक्षितांप्राप्तःकिंकृततद्वदाधुना १५ शकुंतउ० पूर्वजन्मनिराजाहमुग्रबाहुरितिस्मृतः अदक्षिणाःकृतायागाःश्राद्धंचैवमदक्षिणं १६ अदक्षिणानिदानानिमयादत्तानिभूरिशः पुरोधसेमयाद्रव्यंनहस्तेनचचार्पितम् १७ पुराणानिश्रुतानीहतांदास्याम्युक्तवान्पुनः गायकेभ्योनटादिभ्योदत्तंद्रव्यंमयानहि १८ नपूजनंसरस्त्वत्याव्यासस्यापिकथंचन तेनदोषेणनरकान्भुक्त्वापक्षित्वमागतः १९ पुराणश्रवणेचैवफलदानेनभोद्विजाः दिव्यंविमानमारुह्यगच्छामिपरमंपदम् २० एतद्वाक्यसमाकर्ण्यपुपूजुःपरमादरात् विमानवरमारुह्यवैकुंठपदवींययौ २१ इतिसूतमुखोद्गीतंशौनकाद्यामहर्षयः श्रुत्वाश्रुत्वाप्यनस्यापिमाहात्म्यंपदमाप्नुयात् २२ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येत्रिंशोऽध्यायः ३० छ

इतिश्रीज्योतिर्विकुलावतंसच्यकटरामात्मजहरिकृष्णाधिनिर्मितेबृहज्ज्योतिर्वार्णवेऽष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेभाद्रपदमासमाहात्म्यंषष्ठमसमाप्तम् ६ श्रीकृष्णार्पितमस्तु श्रीरस्तुशुभम् छ

यद्भाद्रपदमासमाहात्म्य मुंबईमें पं०श्रीधरशिवलालकेज्ञानसागर छापखानामें छाप्योः संवत् १९४५ शाके १८१० चैत्रशुक्ल १


इतिश्रीमासस्तवकेभाद्रपदमाहात्म्यंसंपूर्णम्.